Sasthra muktha vali;- 17.

KARYADHIKARANA THATHWAM.

BY

KASTHURI RANGA ÇHARIAR

Tharkatheertha & Panditaratna.

Printed and Published

By

The Proprietor Sudarsana Press

CONJEEVERAM.

1903

Price Annas 14.

शास्त्रमुक्तावळी – १७

कार्याधिकरणतत्वम् ।

तर्क तीर्थेन पण्डित रत्नेन च

कस्तूरि रंगाचार्येण,

विरचितम् ।

श्रीकांची– श्री सुदर्शनमुद्राक्षरशालायां तदधिपतिना

अमुद्यत ।

अस्य पुनर्मुद्रणाधिकारः यन्त्रालयाधिपतेरेव ।

इदानीमेतन्मूल्यम् ०- १४- ०

॥ कांची ॥

१९०३

श्रीः ।

श्रियै नमः ।

॥ श्री हयवदनपरब्रह्मणे नमः ॥

श्रीमते रामानुजायनमः ।

॥ शास्त्रमुक्तावळी ॥

श्रीमते निगमान्तमहादेशिकाय नमः ।

॥ कार्याधिकरण तत्त्वम् ॥

यद्भक्ते मुखभेदभिन्नविधयो रेकां (१) प्रकामं श्रितो
ऽशेषाविद्यिककर्मबन्धविगमावद्योतिधीवैभवः ।
भोगे निर्जिततारतम्यकलनायोगे यदौपम्यभा
क्तद्ब्रह्मास्तु हृदन्तरे हयमुखं भद्राय लक्ष्मीसखम् ॥ १ ॥
श्रुत्यन्तदेशिकोत्तंसो नित्यं विहरतां हृदि ।
दुर्वादिसिंधुरसुधा गर्वापहरकेसरी ॥ २ ॥
शश्वद्विश्वागमान्तर्भवदनवधिकातंकशंकानिरासा-
यस्यत्वस्यद्विपश्चिद्वरनिकरमुदाधानदत्तावधानम् ।
धामक्षेमप्रदंत न्मम भवतु सदाचार्यगोष्ठीप्रधानम्
रंगेन्द्रब्रह्मतन्त्रादिमपदकलिजिद्देशिकेन्द्राभिधानम् ॥ ३ ॥
गाढाविद्यावगाहाहितविततदिशामूढतापोढतायै
श्रीकृष्णब्रह्मतन्त्रोत्तमकलिमथनं संश्रयामो गुरुं यः ।

---

(१) "उभयेपिहि" इत्यादिसारग्रन्थानुरोधेन पंचाग्निविद्या तदितरब्रह्मविद्यारूप विधाद्वय मत्र विवक्षितम् । तेन पंचाग्निविद्याया भक्तियोगरूपत्वमेव, नज्ञानयोगरूपत्वम् , तेन तन्निष्ठस्य निश्शेषाविद्यानिवृत्त्यावश्यकत्वं ततश्च ब्रह्मविद्यान्तरनिष्ठव त्परब्रह्मणा भोगतः परमसाम्यावश्यंभाव इत्यमर्थो अत्राभिसंहिता रसूच्यार्थसूचनविधया ॥

ज्ञाने स्थाने ऽ समाने प्रतिपदविविधग्रन्थधाराविधाने
दुर्वाद्युन्मानहाने प्रथयति नतसम्मोददाने गुरुत्वम् ॥ ४ ॥

कार्याधिकरणवादव्याजं कैवल्यमुक्तितावादम् ।
प्रतिवदति सन्मुदेत्र श्रीमा न्कस्तूरिरंगनाथसुधीः ॥ ५ ॥

तात्पर्यचन्द्रिकादिषु विवृतं श्रीभाष्यकारतात्पर्यम् ।
अतिलंघ्य कार्यनीतिं वदतां विशदा ह्यकार्यनीतिरतिः ॥ ६ ॥

इह किल श्रीन्यायसिद्धांजन तात्पर्यचन्द्रिकादिषु प्रमाणनयसम्प्रदायप्रत्यनीकता प्रदर्शनपुरस्सर माचार्यैः पराकृतमपि कैवल्यप्रकारं स्वनं प्रतिष्ठापयितुकामैः कार्याधिकरणवादो निरमायि कैश्चित सांप्रतिकैः ।

सोयं वादो देशिकवरप्रदर्शितदूषणगणानतिवर्त्यैवेति स्फुटम् निपुणं निध्यायतां सताम् ।

यत स्तै स्स्वकीयस्य तद्वादस्यान्ते " कैवल्यं नाम मोक्षः पंचाग्निविदाम् , ब्रह्मविदान्तु परब्रह्मावाप्ति र्नाम मोक्षः , तत्राद्ये परब्रह्मगतानुकूलताप्रकर्षो नानुभूयते, अन्त्येतु सोप्यनुभूयत इति विशेष" इति स्वकीयं परमतात्पर्य माविष्कृतम् ।

तत्रच –

सर्वकर्मविनिर्मोक्षे मुक्तिभेदः कथं भवेत ।
कर्मैकदेशयोगेतु नमुक्ति र्भुक्तिभेदवत ॥
नच कैवल्यवाङ्मात्रा न्मुक्ति रेषेति युज्यते ।
स्वमात्रभुक्तितात्पर्या त्तत्र तस्य प्रयोगतः ॥

इति रहस्यरक्षायां चतुश्श्लोक्यधिकारे प्रदर्शितः प्रधानदोष एव नोद्धृतः । " निरंजनः परमं साम्य मुपैति " " सर्वंह पश्यः पश्यति " इत्यादिश्रुतिस्मृत्यादिप्रमाणविरोधाश्च स्फुटाः । मुक्तस्य

यत्किंचित्पदार्थाननुभवकल्पने मुक्तमात्रस्य कृत्स्नभोगप्रतिपादक भूमाधिकरण दहराधिकरण जगद्व्यापारवर्जाधिकरणादिगत सूत्रभाष्यविरोधश्च । इदमप्यनुगृहीतं तात्पर्यचन्द्रिकायाम् – " परप्राप्त्यादिरहित निस्सकैवल्यकल्पना । सूत्रभाष्यश्रुतिस्मृत्यादीनां बाधेनासिद्ध्यति " इत्यादिना । अत्र ह्यादिपदेन भविष्यत्कालवर्तिभिरपि मुक्तिद्वयाभिमानिभिः तद्भिदाकल्पनौपयिकनिषेधप्रतियोगितया चिकल्पयिषितोपि परब्रह्मगतानुकूलताप्रकर्षप्राप्त्यादिरपि संजिघृक्षित स्त्रैकाल्यतत्त्वविद्भि राचार्यैः । अधिकरणसारावळ्यामपि – संपद्याविर्भावाधिकरणे " अर्वाञ्चो मुक्तिभेदं कतिचि दगणय न्स्वात्ममात्रानुभूतिं तत्र ब्रह्मानुभूते र्विरह उपधितस्स्या त्स्वतो वेति चिन्त्यम् । सन्ति द्वेधापि दोषा स्तत उपचरणा न्मुक्तिशब्दोऽत्र युक्त स्सालोक्यादिप्रभेदेष्वपि सरणिरियं सावधानै र्विभाव्या " इति ।

एवं पंचाग्निविद्यायाः भक्तियोगबहिर्भूतत्वाभिधानं मोक्षेपि विषयतारतम्यप्रयुक्त भोगतारतम्याभिधानंच अनन्ताचार्यविरचित सिद्धान्तसिद्धांजन जीवप्रकरणस्थ ग्रन्थविरुद्धम् । तत्रहि " मोक्षहेतुश्च परविद्या । परविद्यात्वंच ब्रह्मविषयकविद्यात्वं । विद्यात्वंच वेदविहितभक्तित्वं " इत्युपक्रम्य " साच विद्या स दानन्दमया न्तरादित्य शाण्डिल्य दहर मधु भूम वैश्वानर पंचाग्न्यादि विद्या भेदाद्बहुविधा " इत्यभिहितम् । एवं " मुक्ताना मानन्दतारतम्यं संख्याकृतम् परिमाणकृतं विषयकृतं स्वरूपकृतं वा नसम्भवति " इत्युपक्रम्य " नापि विषयकृतम् । ...... तादृशानन्द तारतम्यस्य 'सर्वंहपश्यः पश्यती' त्यादि श्रुत्युक्त सर्वज्ञत्वेन समानेषु मुक्ते ष्वसम्भवात् " इत्यपिचाभिहितम् । ऽचा नन्ताचार्याः कार्याधिकरणवाद कल्पकै रेतैरेव स्वकूटस्थतया ब्रह्मपदशक्तिवाद व्याख्यादौ प्रणताः । तदेवं देशिकवरप्रदर्शितै र्दोषैरेवास्य कबळितत्वेपि स्वकूटस्थवचनव्याहतिशबलितत्वे प्यस्य वादस्य प्रतिवादोयं विद्वज्जनमनोविनोदनाय समारभ्यते ।

तथाहि ।

यत्तावदाहु रुपक्रमएव स्वाभिमतस्या त्रकार्याधिकरणे बला त्प्रसंग मापादयितुकामाः - " इदंचाधिकरणं शास्त्रेषु समन्ततः प्रसिद्धाना मैश्वर्यकैवल्यभगवत्प्राप्तिरूपपुरुषार्थार्थिनां त्रिविधाना मधिकारिणां मध्ये का त्रयति पूर्वाधिकरणनिर्णीत आतिवाहिकगणः कान्वा न नयतीति शंकया प्रवृत्तः" इति ।

तन्न । कार्याधिकरणस्य तादृशशंकया प्रवृत्तत्वे प्रमाणाभावात । नचायमर्थो भाष्यकारै ष्टीकाकारादिभिर्वा ऽभिहितः । प्रत्युत - तस्य तादृशशंकया प्रवृत्तत्वे " ऐश्वर्यार्थिनं बादरि रभ्य गत्युपपत्तेः" इत्यादिरीत्यैव तादृशशंकानिवृत्त्यधिकरणसूत्रप्रणयनापत्तेः । भाष्यादिष्वपि तत्र तत्र विप्रतिपत्तिकोटिनिर्देशप्रदेशे अर्चिरादिनेयत्वेन निर्दिष्टेषु तत्तदुपासकेषु ऐश्वर्यार्थिकत्वा द्युल्लेखावश्यकत्वा पाताच्च । " किमय मर्चिरादिको गणः कार्यं हिरण्यगर्भ मुपासीना त्रयति " इत्यादि विप्रतिपत्तिभाष्ये उपासकविशेष जिज्ञासयैवै तदधिकरणावतारप्रतीतेश्च ।

स्पष्टंचेदं " संशयस्य उपासितृभेदमूलत्वा त्तएनानित्युपासितॄणां प्रतिपन्नत्वाच्च उपासीना नित्यध्याहृतम् " इत्येतदधिकरणश्रुतप्रकाशिकायां । भवत्पक्षेत्वत्र " संशयस्य फलार्थिभेदमूलत्वात " इत्यादिरीत्यैव वक्तव्य मापद्येत । अर्थयमानानित्यस्यैवच सूत्रे अध्याहर्तव्यत्वं प्रसज्येत ॥

एतेन - " हिरण्यगर्भोपासका ऐश्वर्यार्थिनः , परब्रह्मोपासका भगवत्प्राप्त्यर्थिनः , प्रकृतिवियुक्त ब्रह्मात्मक प्रत्यगात्मोपासकाः कैवल्यार्थिनः, इति विवेकः " इति विभागकरणमपि परास्तम् । प्रकृता सम्बद्धत्वात । भगवत्प्राप्तावपि जगद्व्यापारवर्जाधिकरण भाष्यादौ मुक्तैश्वर्यपदस्य व्यवहृततया तदर्थिषु ऐश्वर्यार्थित्वस्या तिप्रसक्ततया

विभागासंगतेश्च ॥ नच प्राकृतैश्वर्यमात्रमेवै श्वर्यपदमुख्यार्थ इति वाच्यम् । प्रयोगानुसारेण प्राकृताप्राकृतसाधारणैश्वर्य वाचकताया स्तत्पद आवश्यकत्वे एकदेशमात्रवाचकताकल्पनस्य बर्हिरा-ज्याधिकरणविरुद्धत्वात । तत्र ह्यधिकरणे बर्हिरादिपदानां संस्कृत मात्रवाचित्व मुत संस्कृतासंस्कृतसाधारण रूपावच्छिन्न वाचकत्व मिति विशये प्रयोगानुसारेण संस्कृतासंस्कृतबर्हिरादिमात्रवाचकत्वं सिद्धान्तितम् ॥

ननु – "ऐश्वर्याक्षर याथात्म्य भगवच्चरणार्थिनाम् । वेद्योपादेय भावाना मष्टमे भेद उच्यते" इति गीतार्थसंग्रहे भगवद्यामुन मुनिभिः फलार्थिना मैश्वर्यार्थित्वादिना त्रेधा विभागप्रदर्शनात् "आर्तो जिज्ञासुरर्थार्थी" त्यादि गीताभाष्येपि भगवता भाष्यकृता आर्ता र्थार्थिनो रैश्वर्यार्थितयैकराश्यस्य जिज्ञासोः कैवल्यार्थिताया ज्ञानिनो भगवत्प्रेप्सुताया श्चाभिधानेन फलार्थित्रैविध्यविशदीकरणाच्च हिरण्यगर्भोपासकादि ष्वत्र तत्तद्विधासम्भवमात्रेणा स्माभिर प्यैश्वर्यपदस्य प्राकृतैश्वर्यमात्रपरता माश्रित्य तथा विवेकः प्रदर्शितो नानुपपन्नइति चे न्मैवम् – "चतुर्विधाभजन्तेमां जनास्सुकृतिनोऽर्जुन । आर्तोजिज्ञासुरर्थार्थी ज्ञानीच भरतर्षभ" इत्यस्य भगवद्भक्त त्रैविध्यपरतायाएवा वश्यकत्वेन फलार्थिसामान्य त्रैविध्यपरत्वाभावात् । नखलु हिरण्यगर्भोपासको भगवद्भक्तः । येन भगवद्भक्तविभाजकतया भगवद्भक्तत्वव्याप्यम प्यैश्वर्यार्थित्वं हिरण्यगर्भो पासके युज्येत । "अनन्यदेवता भक्ता येमद्भक्तजनप्रियाः । मामेव शरणंप्राप्ता स्ते मद्भक्ताः प्रकीर्तिताः" इत्याश्वमेधिके भगवतैव स्वभक्तलक्षणाभिधानात , "चतुर्विधाभजन्तेमां" इत्यत्रापि "मां शरणमुपगम्य मामेवभजन्ते" इत्यवधारणगर्भभाषणदर्शनात , अष्टमाध्याये प्यैश्वर्यार्थिज्ञातव्ययो रधिभूताधिदैवतयो र्विवरणा वसरे "अधिदैवतशब्दनिर्दिष्टः पुरुषः, अधिदैवतं दैवतोपरिवर्तमानं इन्द्रप्रजापतिप्रभृति कृत्स्नदेवतोपरि वर्तमानः इन्द्रप्रजापति प्रभृतीनां भोग्यजाता द्विलक्षण शब्दाद भोक्ता-

पुरुषः, साच भोक्तृत्वावस्था ऐश्वर्यार्थिभिः प्राप्यतया ऽनुसन्धेया " इति भाषणदर्शनाच्च । अत एवेदं सर्वं भगवद्भाष्यकार भाषणमभिप्रेत्य भगवन्निगमान्तगुरुभि र्गीतार्थसंग्रहरक्षायां ऐश्वर्याक्षरेति श्लोकव्याख्यायां " ऐश्वर्य मन्ने न्द्रप्रजापतिपशुपतिभोगेभ्यो ऽप्यतिशयितभोगः " इत्यनुगृहीतम् । यदिपुन रेवं सत्य प्यत्रैश्वर्यार्थिपदं स्वप्रयुक्तं स्वेच्छयैव चतुर्मुखैश्वर्यार्थित्वावच्छिन्नपरता ऽभ्युपगम्यते, तदा स्वायत्ते शब्दप्रयोगे अवाचक पदप्रयोग एव दोषः, तादृशैश्वर्यार्थिना मैश्वर्यार्थितया शास्त्रेषु समन्ततः प्रसिद्धत्वाभिधानेन स्वकीयेनो पक्रमस्थेन विरोधश्च ॥

तस्मा द्धिरण्यगर्भोपासकस्य ऐश्वर्यार्थितया भगवत्प्राप्त्यर्थितः पृथक्परिगणनं कुर्वन्तो लौकिकं सांप्रदायिकञ्च पंथानं सर्वथातिवर्तेत इति सुधियो विभावयन्तु ।

एतेन-"परब्रह्मोपासका भगवत्प्राप्त्यर्थिनः, प्रकृतिवियुक्त ब्रह्मात्मकप्रत्यगात्मोपासकाः कैवल्यार्थिनः " इति विभजनम प्ययुक्तं वेदितव्यम् । कैवल्यार्थिना मपि पञ्चाग्निविद्यानिष्ठानां कैवल्यफल समनन्तर भगवत्प्राप्त्यर्थिताया स्तात्पर्यचन्द्रिकाप्रदर्शिताया स्स्थापयिष्यमाणत्वात । भगवत्प्राप्त्यर्थिनामपि भवदुपदर्शितकैवल्यार्थित्वस्याक्षतत्वाच्च ।

तथाहे-कैवल्यस्य भवद्भि श्चतुरुत्तरशतसंख्यांकिते वाक्ये अचित्संसर्गायत्त जरामरणादि सर्वावस्थामोक्षलक्षणत्वमभिहितम् , षट्पंचाशपुटे त्रयोविंशपङ्क्तौच तस्य प्रकृतिवियुक्तत्वलक्षणत्व मभिहितम् । तदेत दुभयविधकैवल्यार्थित्वमपि भगवत्प्राप्त्यर्थिसाधारणमिति स्पष्टमेव । एकोनषष्टितमपत्रोक्तंतु स्वात्मानुभवानन्दमात्रतृप्तत्वलक्षण कैवल्यार्थित्वं पञ्चाग्निविदाम प्यावश्यक ब्रह्मानन्दानुभवकतया मुक्तिदशायां न सम्भवीति स्थापयिष्यत इति दिक् ।

यदपि –" कार्यं कार्य कोटिप्रविष्टं हिरण्यगर्भ लक्षण मपरं ब्रह्मोपासीन मतिवाहिको गणो नयतीति बादरि राचार्यो मन्यते " इति सूत्रार्थवर्णनं, तन्नसत्, विप्रतिपत्त्या द्यनुसारेण भाष्ये बहुवचनान्तोपासीन पदस्यैवा ध्याहततया एकवचनान्त तत्पदाध्याहारस्य भाष्य विरुद्धत्वात् ।

यदपि –" अस्ये त्येकवचनान्त परामर्शानुरोधा देकवचनान्ताध्याहारः " इति, तन्नयुक्तं । बहुवचनान्तेन प्रकृतस्या प्यौत्सर्गिकैक वचनान्तपदेन परामर्शे बाधकविरहात् । " उत्सर्गत एकवचनं करिष्ये " इतिहि महाभाष्यकृतेष्यते । दृश्यतेच " वसन्ते ब्राह्मणोऽग्नीनादधीत " इत्युत्पत्तिवाक्ये बहुवचननिर्दिष्टानाम प्यग्नीनां " संभारेष्वग्निमादधाति " इतिगुणवाक्ये एकवचनेनानुवादः ।

एतेन –"एतत्सूत्रभाष्ये कार्यं मुपासीनानेव गमयतीति बादरिराचार्योमन्यत इत्यत्र बहुवचनान्तोपासीनपदेनो पासकनिर्देशस्तु पूर्वं विप्रतिपत्तिवाक्ये बहुवचनान्तशब्देन तद्ग्रहणात् तदनुरोधेना र्थापत्त्या समात्र तात्पर्येण, अन्यथा सूत्रे अस्येत्येकवचनान्तशब्देनोपासकपरामर्शास्वारस्यस्य दुष्परिहारत्वात् " इत्यपि परास्तम् । सौत्रपूर्वपक्षि प्रतिज्ञावाक्ये एकवचनान्त तत्पदाध्याहारे बहुवचनान्त तत्पदघटित विप्रतिपत्ति वैरूप्य प्रसंगात् । विप्रतिपत्त्यनुसारेणैवहि साध्यादिनिर्देश स्स्वारसिकः प्रतिज्ञादौ । विप्रतिपत्तेर प्येकवचनान्त तत्पदघटिततास्वीकारेच भाष्यदर्शितयो र्विप्रतिपत्ति प्रतिज्ञावाक्ययो रुभयोर प्यन्यथाकरणापत्तेः, अप्रतीकालम्बनानिति सिद्धान्तसौत्र प्रतिज्ञाविरोधापत्तेश्च । सिद्धान्तसूत्र विप्रतिपत्ति भाष्याद्यनुरोधेन पूर्वपक्षसूत्रघटकस्य अस्येत्येकस्यैव एकवचनस्य औत्सर्गिकताया जात्यभिप्रायकताया वा स्वीकर्तुमुचितत्वात् । दृश्यते हि " अथयदु चैवास्मिं च्छव्यं कुर्वन्ति यदुचन तेर्चिष मेवाभिसम्भवन्ति " इत्युपकोसलविद्यावाक्यादौ परामर्श्य परामर्शकपदयो र्विभिन्नवचनकता तथैवोपपादनीया । स्पष्टं चेदं श्रुतोपनिषत्सूत्र टीकादौ ॥

यदपि - "सूत्रे एकवचान्तोपासीनपदमेवा ध्याहर्तव्य मित्यभि प्रायेणैव तत्सूत्रभाष्यएवान्ते कार्यन्तु हिरण्यगर्भरूपं ब्रह्मोपासीनस्य परिच्छिन्नदेशवर्ति प्राप्यप्राप्त्यर्थं गमन मुपपद्यते, अतोऽर्चिरादि रातिवाहिकगण स्तमेव नयतीति सूत्रार्थोपसंहार एकवचान्त शब्देनैवो पासकस्य नयति कर्मतया निर्देशः कृतः" इति । तदप्यसत । अस्ये त्येकवचनान्तशब्दप्रक्रान्ततयैव तद्भाष्ये निर्गळितार्थ कथनपरे एकवचनान्तेनो पासकनिर्देशस्य भाष्योपदर्शित सूत्र-योजनानुसारिणा मप्युपपत्तेः विप्रतिपत्तिप्रतिज्ञवाक्यगत बहुवचन निर्देशस्य भूयस्त्वेन उपक्रमस्थत्वेनच उपसंहारगतैकवचन निर्देशात्प्रबलतया तस्यैव सूत्रापेक्षित पदाध्याहारं तात्पर्य ग्राहकत्वौचित्याच्च ॥

यदपि -" अतएव चैतत्सूत्रदीपे सूत्रपदयोजनाया मेकवचनान्तोपासीनपदमेवो पात्तम्, यथोक्तं तत्र - ' सूत्रार्थस्तु कार्यं हिरण्यगर्भमुपासीन मातिवाहिको गणो नयतीति बादरिराचार्यो मन्यते, अस्यैव गत्युपपत्ते' रिति " इति । तदपिन । दीपे तथा योजनाश्रयण मात्रेण भाष्यकृतयोजनायाः परित्यागे मानाभावात् । भाष्यदीपसारेषु योजनाभेदस्य बहुधा दर्शनात् । प्रत्युत दीपकृतयोजनाया अप्रतीकालम्बनानिति सिद्धान्तसूत्र प्रकृताधिकरण विषयवाक्याननुसारि स्वरूपास्वरसग्रस्ततया भाष्यसारोभयप्रदर्शितयोजनायामेव भाष्य-कारनिर्भरस्या वश्याश्रयणीयत्वात् । अतएवहि न्यायसिद्धांजनादौ भाष्यसारोपदर्शित रीतिविपरीता " ह्रस्तादयस्तु स्थिते तोनैवं " इति सूत्रयोजना दीपदर्शिता परमता भिप्रायकतयै वोपपादिता ॥

यदपि - " यद्यपि अस्य- कार्यब्रह्मणएव, गत्युपपत्तेः-मार्गविशेषेण देशविशेषं गत्वा प्राप्त्युपपत्तेरिति व्याख्याने प्रतिज्ञापर सूत्रभागे बहु-

बहुवचनान्तोपासीन पदाध्याहारेपि न दोषः, सारग्रन्थो प्येतदभिप्रायकएव स्वरसतः प्रतिभाति " इत्याशंक्य " तथापि गतिशब्दस्य – गमनार्थकताया स्तत्समभिव्याहृत षष्ठ्याः कर्त्रर्थकतायाश्च स्वारसिकत्वा त्तदाश्रित्य यथोक्तयोजनया व्याख्यानं भाष्यदीपयो रादृतमित्यवधेयम् " इति समाधानम् ॥

तदपि न सत् - अस्येत्यस्य कार्यब्रह्मरूपोपास्यपरत्वेपि " सएनान्ब्रह्मगमयति " इत्यादाविव तत्कर्मकत्वस्य उपासककर्तृके गमने ऽबाधितत्वेन गतिशब्दस्य गमनार्थकता स्वारसिकताया अविवादात् । संयोगानुकूलव्यापारोहि गमेरर्थः, उपासकव्यापारेण देशविशेष इव देशविशेषावच्छिन्ने ब्रह्मण्यपि संयोगो जायतएवेति ॥

एवं " चैत्रस्य गतिः " इत्यादेरिव " ग्रामस्य गतिः " इत्यादि कर्मषष्ठीघटितस्यापि प्रचुरप्रयोगेण स्वारसिकताया आवश्यकत्वेन – गतिशब्दसमवधाने कर्मषष्ठ्या अस्वारसिकताभिधान मप्यसमंजसम् ॥ तस्मात् यद्यपीत्यादि भवदीयाशंकैव सुस्थिरा ॥

इदमत्र बोध्यम् – अस्येत्येत दावृत्त्या उपासनकर्म कर्तृभयपरं, अपूर्वपदाध्याहारा पेक्षया श्रूयमाणपदावृत्ते रेव न्याय्यत्वात् । अत एव लाघवेन एकवचनान्ततया अस्येत्यस्योपादानम् ॥ अनयाच सूत्राक्षरभंग्या " सएनान्ब्रह्मगमयति " इत्यादौ उपासकगत बहुत्वमविवक्षितम् , उपासकोद्देशेन ब्रह्मगमनविधिपरे ऽस्मिन्वाक्ये उद्देश्यविशेषण विवक्षणासम्भवस्य ग्रहैकत्वाधिकरण सिद्धत्वात "इति लभ्यते । भाष्यकृतान्तु विप्रतिपत्तौ प्रतिज्ञायांच उपासकस्य बहुवचनेन निर्देशः अप्रतीकालम्बनानिति सिद्धान्तानुसारि सौत्रप्रतिज्ञानिर्देश मनुरुध्य । सोपिच सौत्रोनिर्देशः केवलं विषयवाक्यभूतोदाहृत श्रुति– प्रत्यभिज्ञापनाय, नपुन र्बहुत्वविवक्षाभिप्रायेण ॥ " कुतः, हिरण्यगर्भमुपासीनस्यैव गत्युपपत्तेः " इति हेतुविवरणभाष्ये गतौ उपास्यब्रह्म

कर्मकत्वस्यानभिधानं च स्पष्टत्वादेव । "नहि परिपूर्णं सर्वज्ञं सर्वगतं सर्वात्मभूतं परं ब्रह्मोपासीनस्य तत्प्राप्तये देशान्तरगति रुपपद्यते" इति भाष्यन्तु विपर्यये अनुपपत्तिप्रदर्शनपरमेव । नतु हेतुवाक्यार्थ विवरणम् । अतस्तत्र स्फुटत्वाय देशान्तरस्य कर्मत्वोक्तावपि न विरोधः" नच "उभयप्राप्तौ कर्मणि" इत्यनुशासनात् अस्येत्यस्यावृत्तौ कर्तरि कर्मणिच षष्ठी दुर्लभा; "शेषे विभाषा" इत्यनेन–"विचित्राजगतः कृतिर्हरे र्हरिणावा" इत्यादाविव स्त्रीप्रत्ययान्त गतिशब्द समवधानेन तदुपपत्तेः । अतएव "ब्रह्मोपासीनस्य–तत्प्राप्तये देशान्तरगति रुपपद्यते" इत्यत्रैव भाष्यसूक्तौ समास–घटकतया देशान्तरपदे कर्मषष्ठ्या उपासीनस्येति कर्तृषष्ठ्याश्चोपपत्तिः । यदिच ईदृश बहुतरप्रामाणिक प्रयोगदर्शनादौ दृशस्थले ऽन्यतरस्याष्षष्ठ्या श्शेषषष्ठीत्वेनैव निर्वाहः क्रियते, तदाप्यस्माकमपि न कश्चिद्दोषस्तथैवोपपत्तेरिति ॥

यद्वा – इदंच इमेच इत्येवं कार्यब्रह्म तदुपासक परामर्शकाभ्या मेकवचनबहुवचनान्ताभ्या मिदं पदाभ्यां विग्रहे "त्यदादीनि सर्वैर्नित्यं" "नपुंसकमनपुंसके नैकवच्चान्यतरस्यां" इति नपुंसकैकशेषैकवद्भावयो रस्येति निर्देशस्सौत्रः । यथा "अथयदिद मस्मिन्ब्रह्मपुरे दहरं पुण्डरीकंवेश्म दहरोस्मिन्नन्तर आकाशस्तस्मि न्यदन्तस्तदन्वेष्टव्यं॥" इति दहरविद्यावाक्ये दहराकाश तदन्तर्वर्तिनो स्तदिति श्रौतोनिर्देशः श्रीभाष्यटीकादिषु प्रदर्शितः । यथावा "दधि मधु घृत मापोधानास्तण्डुला स्तत्संसृष्टं प्राजापत्यं" इति चित्रेष्टिवाक्ये दध्यादीनां तदिति निर्देशश्श्रौत स्तन्त्र रत्नादि प्रदर्शितः । गतौच प्रकृते कार्यब्रह्म तदुपासक रूपार्थ द्वयान्वये यथायोगं कर्मत्वं कर्तृत्वंच षष्ठ्यर्थसंबन्धो बोध्यः । "एकापि षष्ठीविषय भेदाद्भिद्यते" इति हि वैयाकरणाः "आदेशप्रत्यययोः" इत्यादौ ॥ "अस्य- हिरण्यगर्भमुपासीनस्यैव" इति भाष्यन्तूपासक गत बहुत्वा विवक्षाभि-

प्रायेणार्थ विवरणमात्रम् । आवृत्त्याद्याश्रयेण विवक्षितार्थस्य सूत्रा- रूढ़ताभिधानंच तन्त्रान्तरेष्वपि सुप्रसिद्धं । तस्मा त्सौत्रपूर्वपक्ष- प्रतिज्ञायां सिद्धान्तप्रतिज्ञानुरोधेन बहुवचनान्तोपासक पदाध्या- हारेपि कस्यचि दप्यस्वारस्यस्याप्रसक्ते र्मुधैव भाष्यप्रदर्शितयोजनां सिद्धान्तसूत्राद्यनुरोधं चोल्लंघ्य प्रतिज्ञापरसूत्रे एकवचनान्तोपासक पदाध्याहारावश्यकत्वाभिधानं साहसमेवेति विदां कुर्वन्तु विद्वांसः ॥

यदपि – " ननु कार्यशब्दः प्रकृतिमण्डलान्तः पातिकृत्स्नकार्य- वर्गवाचीति सर्वएवैश्वर्यार्थिनः कार्योपासकत्वेन विवक्षितुं योग्याः " इत्याद्याशंकनं – तदपि नसत् । हिरण्यगर्भोपासकाना मेव शास्त्रप्र- सिद्धैश्वर्यार्थि पदार्थत्वा संभवस्य प्रागावेदिततया तदर्वाचीनकार्यो- पासकाना मैश्वर्यार्थिपदार्थताया स्सुतरा मसंभवात् । साध्यकोटिप्रवि ष्टनयति द्विकर्मकत्वाद्यनुरोधेन तत्कोटौ गमने ब्रह्मकर्मकत्वस्यापि घ- टकतया चतुर्मुखावार्चीने हलौकिकैश्वर्यार्थि कर्तृक ब्रह्मकर्मकगमना- प्रसिद्ध्या यावदैश्वर्यार्थि विवक्षायां साध्याप्रसिद्ध्यापत्तेश्च चतुर्मुखा- र्वाचीनैश्वर्यार्थिनां ब्रह्मकर्मक गमनानुपपत्त्या " अस्यगत्युपपत्तेः " इति हेत्वन्वयानुपपत्तेश्च तथाशंकाया एवा नवतारात् । अतएव " इ दमत्रावधेयं " इत्यादिना उत्तरसूत्रानुरोधा द्यनुधावनपूर्वक तत्समाधा- न कल्पना प्रयासो ऽप्यनुपादेयः ॥

तदेव मेतदधिकरणोपक्रम सूत्रविवरणे दिङ्मात्रेण दर्शिताद्दोषाः । येतुपुनः " विशेषितत्वाच्च " इत्यादि सूत्रार्थवर्णनादावपि तदीयभा- ष्याक्षरस्वारस्य भंगादयो दोषास्ते नातिमात्रं सैद्धान्तिकार्थाधरोत्तरभा- वावहा इत्युपेक्ष्यन्त एव ग्रन्थगौरवभीरुभि रस्माभिः ॥

येऽपि " स्वोपासनेन अप्रेप्सित फलप्राप्तौ तत्क्रतुन्याय विरोधात्, ' सएना न्ब्रह्मगमयर्ता त्यादिकाया स्तदानीमेव ब्रह्मप्राप्ति श्रुतेर्वि- रोधाच्च, " इत्यादि चतुरशीतितम वाक्यादौ अपसिद्धान्ता दयो दोषा

स्ते सिद्धान्त सूत्रार्थ विचारा वसरएवा स्माभिः प्रदर्शितैरर्थैः प्रदर्शित प्रायाएव भविष्यन्तीति सिद्धान्त सूत्रार्थ विचार एवा धुना समारभ्यते ॥

तथाहि- यदुक्तं-"अप्रतीकालम्बना न्नयतीति बादरायण उभयथाच दोषा त्तत्क्रतुश्च" अप्रतीकालम्बनान्-प्रतीकं परम प्राप्यादर्वाचीनं वस्तु अचित्तत्वं तन्मिश्रं चित्तत्वंवा आलम्बन्ते प्राप्यतयो पासतइति प्रतीकालम्बनाः, ते नभवन्ती त्यप्रतीकालम्बनाः, तान् परमप्राप्यभूतमेव वस्तु अचिद्वियुक्तं चित्तत्वं परं ब्रह्मवा प्राप्यतयोपासीना न्पंचाग्निविच्छाण्डिल्य प्रत्यगात्म विद्यानिष्ठाः परमात्मविद्यानिष्ठाश्चे त्युभयविधानपीति यावत। नय त्यातिवाहिको गण इति बादरायणो मन्यते। उभयधा च- बादरिपक्ष जैमिनिपक्षयोरुभयोरपि, दोषात् श्रुतिविरोधात्। तक्रतुश्च-तथोपासीन स्तथैव प्राप्नोतीत्ययं न्यायश्च, इह भवतीति च बादरायणो मन्यतइति सूत्रार्थः।" इति।

तदसत् - प्रतीकपदस्य परमप्राप्यावधिका र्वाचीनत्वावच्छिन्न परतायाः कोशतोवा प्रयोगतोवा ऽसिद्धेः। आलम्बन्ते इत्यस्य परम प्राप्यतयोपासत इत्यर्थकत्वस्यापि प्राप्यत्वांशप्रत्यायक पदाभावेन असिद्धेः। आलम्बनपदार्थएवोपासनस्य प्रविष्टत्वे अनावृत्तिसूत्रे "प्रतीकालम्बनोपासनानां सावधिकैश्वर्ये" इति टीकायां पृथगुपासन-पदोपादानासंगति प्रसंगात्। अचिद्वियुक्त चित्तत्वस्यापि परमप्राप्या द्भगवतो र्वाचीनतया तदुपासकानां प्रतीकालम्बनत्वापातेन अप्रतीकालम्बनपदार्थतया विवक्षणासंगतेश्च। परमप्राप्यत्वावच्छिन्ना वधिताकार्वाचीनत्वस्य तत्पदेन विवक्षणेपि उपासा त्रैविध्यन्यायानुसारेण ब्रह्मोपासनाया मचितोपि विषयत्वेन उभयविभूति विशिष्टब्रह्मरूप प्राप्यान्तः पातितया प्राप्यत्वस्यापि तत्राक्षतेर्ब्रह्मोपासकानामपि - प्रतीकालम्बनत्वापत्ति र्दुर्वारैवेति ॥ अधिकमग्रे व्यक्तीभविष्यतीति ॥

तस्मादिहेत्थ मप्रतीकालम्बन शब्दार्थो द्रष्टव्यः – प्रतीकोव यवः “ अंगं प्रतीकोवयवः ” इत्यादिकोशात् । सचांशाधिकरणोक्तां शवदेकदेशरूपः, बृहदारण्यकाष्टमाध्याय द्वितीयब्राह्मणे पंचाग्निवि- द्यायां “ पंचमाप्रश्नाव्राजन्य बन्धुरप्राक्षी त्ततो नैकंचनवेदेति कतमे· तेइतीमइतिह प्रतीकान्युदाजहार ” इत्यत्र प्रतीकपदस्यैकदेशपरतयो पनिषद्भाष्ये विवरणकरणात् । “ मेरो रंशः किरीटप्रभृतिरिति नया- न्नित्यभिन्नेंशतोक्ति स्साजात्याल्पत्वमूला गमयितुमुचिते त्यागमासन्न पक्षे । अंशोक्तिस्स्यादमुख्या सहि निपुणधिया मेकवस्त्वेकदेश स्त- स्मा ज्जीवोविशिष्टे भगवति गुणव त्तत्प्रकारोंश उक्तः ॥ ” इत्यधिकरण सारावल्या मवयवप्रतीकादिपद पर्यायांश पदप्रवृत्तिनिमित्त निष्कर्षणातु साराच्च । प्रतीकः आलम्बनं विषयेयेषान्ते प्रतीकालम्बनाः, स्वसमवेतोपा सननिरूपितत्वस्य विषत्वान्वयिन ष्षष्ठयर्थताविवक्षणात् एकदेशोपासकाः अब्भक्षादिवदवधारण गर्भत्वादेकदेशमात्रोपासकाः अकृत्स्नविदः“स एष इहप्रविष्ट आनखाग्रेभ्यो यथाक्षुरःक्षुरधानेऽवहितस्स्याद्विश्वम्भरोवा विश्व· म्भरकुला येतन्नपश्य स्यकृत्स्नोहि सप्राणन्नेव प्राणोनाम भवति वद· न्वाकपश्यं श्चक्षु श्शृण्वन्श्रोत्रं मन्वानो मन स्तान्यस्यैतानि कर्म नामा· न्येव सयोत एकैक मुपास्ते न सवेद अकृत्स्नो ह्येषोऽत एकैकेन भव· त्यात्मे त्येवोपासीता त्रह्येते सर्व एकं भवन्ति ” इति श्रुताविव वस्तुतो ब्रह्मात्मके वस्तुनि ब्रह्मात्मकत्व मननु संदधता मकृत्स्न वित्त्व- कण्ठोक्तेः, ब्रह्मात्मकत्व विशेषण विनिर्मुक्त ब्रह्मात्मकत्वो पलक्षित वस्तु विषयको पासनवन्त इति यावत् । तेच नामादि प्राणशब्द निर्दिष्ट प्रत्यगात्म स्वरूप पर्यन्तं सर्वं चिदचिद्वस्तु जातं ब्रह्मदृष्ट्या स्वरूपेणवा उपासीना स्सर्वएव, तदीयोपासने सर्वत्रैव ब्रह्मात्मकत्वा नवच्छिन्न ब्रह्मात्मकत्व समानाधिकरण विषयताकोपासनत्व स्याविशि· ष्टत्वात् । एतदभिप्रायेणैव “ अर्चिरादि गति निषेधस्तु ब्रह्मात्मक स्वात्मानुसंधान रहित स्वात्मोपासन विषयः ” इत्यनुगृहीतं तात्पर्य चन्द्रिकायां ॥

यत्तु प्रतीकाधिकरण भाष्ये “ प्रतीकोपासनं नाम अब्रह्मणि ब्रह्मदृष्ट्या नुसन्धानं ” इति भाषितं तत्र प्रतीकोपासन मित्यनेन तदधिकरणो पक्रम प्रक्रान्तं ब्रह्मविषयोपस्कृत प्रतीकोपासनमात्रं विवक्षितं, अन्यथा कार्योपासनाया दृष्टयुपासनभिन्नायाः प्रतीकोपासनात्वा नुपपत्तिप्रसंगेन तद्भाष्यस्य प्रतीकोपासनसामान्यलक्षणपरत्वा नुपपत्तेरिति ध्येयम् ।

अतएवाचार्यैः प्रतीकोपासनं षोढाविभज्य दर्शितम् - “ ध्यायेयुर्येच जीवा न्प्रकृतिशबलिता न्केवलान्वा यथेष्टं द्वेधापि ब्रह्मदृष्ट्या जडनिवहमपि स्वेन यद्वान्यदृष्ट्या । ते सर्वेहि प्रतीकप्रणिहित मनसो नार्चिराद्यध्वयोग्या ब्रह्मोपास्तेश्च लिंगं गतिरिय मनघासूत्रितापूर्वमेवे” ति ॥ तस्माद्ब्रह्मात्मकत्वानवच्छिन्न ब्रह्मात्मकत्व समानाधिकरण विषयताको पासनत्वमेव प्रतीकोपासनसामान्यलक्षणं ग्राह्यम् । चिदचिद्विषयतां ब्रह्मविषयतां चादाय ब्रह्मोपासनेऽतिप्रसंगवारणाया नवच्छिन्नान्त समानाधिकरणान्तयो र्विषयताविशेषणत्वम् । तादृशोपासनवत्त्वमेव तु प्रतीकालम्बनत्वं अर्चिरादिगतिनिषेध योग्यतावच्छेदकम् ॥

स्पष्टंचेदं सर्वार्थसिद्धौ – “विश्वान्तर्यामितत्त्वं स्वयमिह चिदचिद्विग्रहैर्वा विशिष्टं यस्या मालम्बनं साभवभयशमनीवीतरागस्य विद्या । यस्तूपास्ते यथोक्तं तदितरदखिलं ब्रह्मदृष्टया स्वतोवा नैतस्य ब्रह्मनाड्योद्गतिरपि नपदव्यर्चिरादि र्न मोक्षः ॥ ” इत्येतद्विवृतौ “ स्वतः- ब्रह्मपर्यन्ततां ब्रह्मदृष्टिंच विहाय ” इत्यत्र ॥

प्रतीकालम्बनेभ्योऽन्ये अप्रतीकालम्बनाः । तेच यद्यपि यत्किंचिद्प्य नुपासीना अपिभवंति । तन्नेतृत्वंचातिवाहिकगणस्या संभवि । तथापि प्रकरणबलात् उपासीनानिति विशेष्योपस्थितेः प्रतीकालम्बन भिन्नानुपासी नान्नयतीति सूत्रार्थः । तेचस्वात्मादिशरीरक ब्रह्मोपासका ब्रह्मात्मकस्वात्मोपासकाश्चेति द्विविधाः । आद्योपासने ब्रह्मणि स्वात्मशरीरकत्वस्यभाने स्वात्मनि ब्रह्मात्मकत्वस्यापि भानावश्यम्भावात् ब्रह्मात्मकत्व- समानाधिकरणाया स्स्वात्मविषयताया ब्रह्मात्मकत्वा नवच्छिन्नत्वा-

संभवात् । इत्थमेव ब्रह्मणीतर पदार्थानां भानेपिबोध्यं । एवं द्वितीयोपासने स्वात्मनि ब्रह्मात्मकत्वभान मतिस्फुटमेव ॥

यद्वा-उपासीनानिति विशेष्यवाचकं पदान्तरं नैवपूरणीयं । अप्रतीकालम्बनानिति पदमेव त्वावर्तनीयं । अप्रतीक मनवयवभूतं एकदेशव्यावृत्तं विशिष्टं, अर्थात्परिपूर्णब्रह्म, तदालम्बनंयेषान्ते अप्रतीकालम्बना इत्यावर्तितस्यार्थः, इतिनानुपासक मादायातिप्रसंगः ॥ यद्यपि स्वात्मशरीरक ब्रह्मणोपि निखिल चिदचिद्विशिष्टाखिलगुणक ब्रह्मैकदेशतया तदुपासकानां परिपूर्णोपासकत्व मसंभवि। तथाप्युदाहृतश्रुतौ उपास्यमानस्यै कैकस्यापि वस्तुनः ब्रह्मात्मकत्व प्रतिसंधानमात्रेण कृत्स्नवित्त्वाम्नानान्नियत विशेषणक ब्रह्मोपासकानामपि उपासनविषय तत्तद्वस्तुषु ब्रह्मात्मकत्व प्रतिसंधानादेव परिपूर्णोपासकत्वमिह विवक्षितं नानुपपन्नम् ।

एतदभिप्रायेणैव सारे - " उभयेपि हि परिपूर्ण ब्रह्मोपासते, मुखभेदेन स्वात्मशरीरकं ब्रह्म केचन ब्रह्मात्मक स्वात्मानमितरे " इत्युभयेषामपि अप्रतीकालम्बन पदार्थत्वोपपादनाय परिपूर्णपदोपादानं कृतं वेदितव्यम् । अन्यथा ब्रह्मोपासकत्वकथनमात्रेणैव ब्रह्मप्राप्ति सिद्ध्या तत्क्रतुन्यायानुसार सम्भवे परिपूर्णपदोपादानं विफलमेव स्यात् । एवं द्वितीयोपासने स्वात्मनि ब्रह्मात्मकत्व कथनस्य द्वितीय कोटिप्रविष्टानां प्रतीकालम्बनभिन्नत्वोपपत्तये आवश्यकत्वेपि प्रथमोपासने ब्रह्मणि स्वात्मशरीरकत्वकथनमपि विफलं स्यादिति ॥ तत्र सारे मुखभेदेने त्यस्य मुख्यविशेष्यभेदेने त्यर्थः ॥ यद्यपि ब्रह्मात्मकस्वात्मोपासने ब्रह्मणि स्वात्मशरीरकत्वस्य तुल्यवित्ति वेद्यतया भानं विना विशिष्टब्रह्मोपासनात्वरूप परिपूर्णब्रह्मोपासनत्वासिद्धिः, तद्भानेच स्वात्मनो मुख्यविशेष्यत्वानुपपत्तिः, प्रकारत्वात ; प्रकारत्वानास्कन्दित विशेष्यत्वस्यैव च मुख्यविशेष्यतारूपत्वादिति मुखभेदोक्ति र्न घटते, तथापि विशेष्यस्य तुल्यवित्तिवेद्यतया प्रकारीभवनस्थले विशेष्यत्वप्रकारत्वयो रवच्छेद्यावच्छेदकभावा नंगीकारेण प्रकारत्वानवच्छिन्न विशेष्यतारूपाया मुख्यविशेष्यता-

या स्स्वात्मन्यक्षततया नोक्तानुपपत्तिः। अन्यथा प्रत्यक्षे तुल्यवित्ति-वेद्यताया स्सर्वसम्मततया तत्र मुख्यविशेष्यताविलयप्रसंगात॥ एतेन – स्वात्मशरीरक ब्रह्मोपासने स्वात्मविषयताया ब्रह्मात्मकत्वानवच्छिन्नत्वा त्तथोपासनवतां प्रतीकालम्बनत्वापत्तिरपि न शंकनीया। तुल्यवित्तिवेद्यतया तत्रापि स्वात्मविषयताया ब्रह्मात्मकत्वावच्छिन्नत्वात। उपासनायां तुल्यवित्ति वेद्यत्वानंगीकारेतु तत्र ब्रह्मात्मकत्वा नवच्छिन्नत्वं ब्रह्मात्मकत्व संशय प्रतिबन्धकता नवच्छेदकत्वं, स्वात्म शरीरकत्व विशिष्ट ब्रह्मज्ञानीय स्वात्म विषयताया विरोधि विषयक ज्ञानीयतया तत्संशय प्रतिबन्धकतावच्छेदकत्व मक्षतं। एवं परिपूर्ण ब्रह्म विषयकत्व मप्युपासनायां परिपूर्ण ब्रह्म विषयक संशय प्रतिबन्धकता वच्छेदक विषयताकत्वं, ब्रह्मात्मक स्वात्मोपासनाया अपि विरोधि विषयकत्वा विशेषेण ब्रह्म विशेष्यक स्वात्म शरीरकत्व विरहग्रह प्रतिबन्धकत्वा दिति।

एतेनोपासनायां तुल्यवित्ति वेद्यत्वां गीकारे पश्चाग्नि विद्यायां "तद्यइत्थं विदुः" इत्यादिना उपासक द्वैध निर्देशा नुपपत्तिः, आत्म मुख्य विशेष्यकत्व ब्रह्ममुख्य विशेष्यकत्वयो रितरेतरो पासन व्यावृत्तत्वा संभवादिति शंकापि निरवकाशा।

वस्तुतस्तु ब्रह्मात्मकत्वा नवच्छिन्नत्वं ब्रह्मविषयता निरूपित शरीर शरीरि भाव रूपतादात्म्य सम्बन्ध निष्ठ सांसर्गिक विषयत्वा निरूपितत्वं। परिपूर्ण विषयकत्वमपि तादृश सांसर्गिक विषयता निरूपित ब्रह्मनिष्ठ विषयताकत्वमेव। स्वात्मादि शरीरक ब्रह्मोपासनेषु स्वात्मादीनां स्वनिष्ठ शरीरता निरूपकत्व सम्बन्धेन ब्रह्मणि प्रकारत्वात् ब्रह्मात्मक स्वात्मोपासनेच ब्रह्मणः स्वनिष्ठ शरीरिता निरूपकत्व-सम्बन्धेन स्वात्मनि प्रकारत्वा दुभयविधोपासन संग्रह इति ध्येयं॥

अनेनच सारग्रन्थेन पश्चाग्निविदां तदितर ब्रह्मविदांच उपासन एव केवलं मुख्य विशेष्यता भेदाद्भेदो नतु प्राप्यांशेपि नवागत्यंशेपीति स्पष्टमवगम्यते। अतएव पश्चाग्नि विद्याया वैश्वानरादि ब्रह्म-

विद्यया सह तुल्यफलत्वं वैकल्पिकत्वंचाभिहितमाचार्यैः - "विद्याः पंचाग्नि वैश्वानर दहरमधुन्यास सत्पूर्वसंज्ञा नानाशब्दादिभेदात्तुलित फलतया तद्विकल्पश्च शिष्टः । कर्मज्ञानाख्य योगौत्विह परभजनाधि क्रियार्थौ स्वदृष्ट्या धर्मैर्वर्णाश्रमाणां त्रयमिद मवदन्स्वेति कर्तव्यता-कम् ॥" इति ॥ परन्तु गीतायां पंचाग्निविदो जिज्ञासु पदेन गीता-भाष्ये कैवल्यार्थिपदेनच निर्देशात् पंचाग्निविद्यानिष्ठस्य स्वात्ममा-त्रानुभवरूपं कैवल्यमान्तरालिकफलं कल्प्यते , मधुविद्यानिष्ठस्य वस्वादिफलप्राप्तिवत् । तादृशफलान्तरव्यवहित तदव्यवहितपर-ब्रह्मप्राप्तीच्छाभेद मात्रेण जिज्ञासुज्ञानिनो राशिभेदकरणं गीतायाम् , नतु प्रधानफलभेदेन । "तद्य इत्थं विदुः" इत्यादिश्रुता वविशेषेण ब्रह्मप्राप्तिरूप प्रधानफलश्रवणेन तद्भेदकल्पनाया असम्भवात् । इति सैद्धान्तिकी पद्धति स्तात्पर्यचन्द्रिकादौ स्फुटतरेति दिक् ।

यत्तु - "पंचाग्निविदो ब्रह्मविदश्च उभयविधा व्रयत्य र्चिरादि गणः" इत्युक्त्वा "कथ मेतेषा मुभयेषां पर मर्चिरादिगामित्वं - नान्येषा मिति चेत् ?" इत्याशंकनम् । तदपेशलम् , उभयेषा मेषामे-व गत्याम्नानबलादेव तदितरेषा मर्चिरादिगत्यभावसिद्धेः स्फुटत्वात्त-दाशंकाया एवानुत्थानात् । श्रौतेर्थे यथा श्रुत्येव प्रत्येतव्यत्वात् तत्र युक्त्यन्तरजिज्ञासाया विफलत्वात ॥

यदपि -- "इदमत्र पर्यालोचनीयम् - अर्चिरादिगतिशास्त्रे ब्रह्म प्राप्त्यपुनरावृत्ति फलश्रवणात्तादृश फलयोग्याएवा र्चिरादिगतियो-ग्याः । येतु ब्रह्मप्राप्त्यतिरिक्त नश्वरप्राप्यलक्षणप्रतीकं प्राप्यतया ऽध्यवस्यन्ति नतेतादृशगतियोग्याः, तेषां प्राप्यनाशेन पुनरावृत्तेरवर्ज-नीयतयोक्त फलयोग्यता विरहात । प्रतीकालम्बन व्यतिरिक्तास्तु सर्व एव तादृश गतियोग्याः , तेषां पुनरावृत्तिहेतु प्रतीका-लम्बित्व विरहेणो क्तफल योग्यत्वा नपायात् ।

तथाविधा अधिकारिण उक्तोभयविधा एव भवन्तीति तेषामेवा र्चिरादिपथगामित्वं नान्येषामि"ति समाधानकल्पनं । तदप्यसत् , अर्चिरादिपथगामिताया मपुन रावृत्तिफलयोग्यताया स्तत्रच विनश्वर वस्तुप्राप्यत्वाध्यवसायाभावस्य नियामकत्वकल्पने प्रमाणाभावात् । " सएना न्ब्रह्म गमयति " इत्यत्रेदं शब्दपरामृष्टोपासनाया एवार्चिरादिपथगामिता नियामकत्वावगमात् । किंचैवम् नित्यविभूतिमात्रं प्राप्यतयोपासीनाना मप्यपुनरावृत्तिलक्षणफलयोग्यत्वापत्त्यार्चिरादिपथगामित्वापातः । नचेष्टापत्तिः , भवद्भिरपि ब्रह्मप्रत्यगात्मोपासकातिरिक्तस्या र्चिरादिगत्यनभ्युपगमात् ॥ नच नित्यविभूतिमात्रोपासने प्रमाणविरहा न्नतदादायोक्तातिप्रसंगइति वाच्यम् । एवंसति पंचाग्निविद्या निर्दिष्टातिरिक्ताना मर्चिरादिगत्यभाव कैमर्थ्यशंकाया अपि प्रमाणाभावहेतुनैव निरासस्सम्भवेन तत्र युक्त्यन्तरानुसरणस्य निर्बीजत्वात । भवद्भि रप्यन्ततः प्रमाणाभावस्यैव शरणीकरणीयत्वात ॥ एवं - भूमविद्याप्रकरणस्थप्राणशब्दनिर्दिष्ट प्रत्यगात्मोपासकाना मप्यर्चिरादि गत्यापत्तिः, नित्यस्यैवप्रत्यगात्मनः तत्र प्रतिसंधानात् । नचप्राणोपासकस्या चिन्मिश्रोपासकतया विशेषणविनाशे विशिष्टस्य ननित्यत्वमिति वाच्यम् । " प्राणशब्दनिर्दिष्टः प्राणसहचारी प्रत्यगात्मा, नवायुविशेषमात्रं " इति श्रीभाष्ये प्राणसहचारीत्यस्य प्राणपदलक्षणाप्रयोजकसम्बन्धमात्रप्रदर्शनपरतया प्रत्यगात्म परतायां एव प्राणपदे लाभात । अतएव भूमाधिकरणे " प्राणशब्दनिर्दिष्टप्रत्यगात्म याथात्म्यवेदिनस्तु पुरुषार्थभूयस्त्वातिशय म्मन्वानेन 'सवा एष एवं पश्यन्नेवं मन्वान एवं विजानन्नतिवादी भवति' इत्यतिक्रान्तवादित्व मुक्तम् । अतोत्रैव आत्मोपदेश स्समाप्त इति मत्वा शिष्यो भूयो नपप्रच्छ । आचार्यस्त्विदमपि सातिशयं मत्वा " इत्यादिना प्राणोपासकस्य प्रत्यगात्म याथात्म्यवेदिता स्फुटतरं भाषिता ॥ अतएवच - " एवमव्यक्तादितत्त्वचिन्तकानामिव प्रत्यगा

त्मतत्त्वचिन्तकानामपि तदुचितदेशकालं ततो ऽतिशयितं फल मुप पद्यते । अतएव भूमविद्यायां प्रत्यगात्ममात्रोपासकस्या प्यतिवादि-त्वमुक्तम् । ब्रह्मात्मकस्वात्मानुसन्धानेतु ब्रह्मप्राप्तौ विश्रमा दपुनरा वृत्तिरिति विशेषः " इति तात्पर्यचन्द्रिकायां प्राणोपासकस्य ब्रह्मा त्मकत्वानुसन्धानविनाकृत प्रत्यगात्मतत्त्वचिन्तकता पुनरावृत्तिम-त्ता चाभिहिता ॥

यद्यपि – प्राणोपासकस्या त्मयाथात्म्यवित्त्वे स्वात्मनो ब्रह्मात्मक तामतिसन्धान मप्यावश्यकं, अन्यथा अब्रह्मात्मकत्वप्रतिसन्धाने आत्मा ऽयाथात्म्यवित्त्वापत्त्या आत्मयाथात्म्यवित्त्वभाषणविरोधः । वक्ष्यतेच वस्तूनां भाने द्वय्येव गतिः ब्रह्मात्मकत्वेनवा अपराधीनत्वापरपर्याय स्वप्रतिष्ठितत्वपर्यवसिताब्रह्मात्मकत्वेनैव वेति । तथापि " चराचर व्यपाश्रयस्तु स्यात्तद्व्यपदेशो भाक्तस्तद्भावभावित्वात् " इतिन्यायेन ब्रह्मप्रतीतेः प्राक् ब्रह्मात्मकत्वप्रतिपत्तिदौर्लभ्येन ब्रह्मात्मकत्व तद्व्याप्त्या तिरिक्त धर्मांशएव याथात्म्यवित्त्वं प्राणोपासकस्य भाष्ये विवक्षि-तमित्यास्थेय मतो नोक्तदोषः ॥

एतेन – " प्राणोह्येवैतानि सर्वाणि भवती त्यादिषु एतच्छब्दनि-र्दिष्टप्राकृत सकलप्राणि लक्षणाचिन्मिश्रिततत्स्वरूप परिमित फल-प्राप्त्य वगमाद चिन्मिश्रित एवप्रत्यगात्मा प्राणशब्दार्थः " इति – परास्तं । देहस्यपित्रादि रूपताव्यावर्तन पुरस्सरं प्राणशब्द निर्दिष्ट जीवस्यपित्रादि रूपता प्रदर्शकत्वेन तद्वाक्यस्य फलप्रदर्शकत्वाभा-वात । स्पष्टंचेद मुपनिषद्भाष्ये ॥ अतएवसारे " प्रतीकालम्बनाहि नामादिप्राणशब्द निर्दिष्ट प्रत्यगात्मस्वरूप पर्यन्तं सर्वं चिदचिद्वस्तु-जातं ब्रह्मदृष्ट्यास्वरूपेणवायउपासतेते " इतिप्राणशब्द निर्दिष्टत्वं प्र-त्यगात्मस्वरूप स्याभिहितम् । ततएव चैतत्सारसूक्त्यनुरोधेन " अ-चिन्मिश्रं केवलमचिद्वस्तुच सिंहो देवदत्त इति वत् ब्रह्मदृष्ट्यास्व-

रूपेणवा तद्वस्तु य उपासते ” इति दीपसूक्तौ अचिन्मिश्र केवलप दयो रध्याहर्तव्य चिद्वस्तुपदेन विशेष्यवाचकेनान्वय मंगीकृत्य “ अचिन्मिश्रं चित्तत्वंवा केवलं तदमिश्रितं चित्तत्वंवा अचिद्वस्तुवा ब्रह्मदृष्ट्यास्वरूपेण वा य उपासते ” इत्यर्थोंऽगीकार्यः । एतदभिप्रायेणैव “ ध्यायेयुर्येच जीवान् ” इत्याद्यधिकरण सारावळी ग्रन्थः “ यस्तूपास्ते यथोक्तं तदितरदखिलं ब्रह्मदृष्ट्या स्वतोवा ” इत्यादि तत्वमुक्ताकलापग्रन्थश्च प्रवृत्ताइति दिक् ॥

यदपि - “ नच पंचाग्निविदोहि कर्मवशेन भूतसूक्ष्मसम्परिष्वक्तमेव तत इत स्संचरन्तं प्रत्यगात्मानमुपासीना श्श्रूयन्ते । नच ते प्रतीकालम्बन व्यतिरिक्ता भवितु मर्हन्ति , क्षरणशीला चिन्मिश्रो पासकत्वात् । अतः पंश्चाग्निवित् ब्रह्मविदुभयानुगमेन अप्रतीकालम्बना न्नयतीति प्रतिज्ञानं व्याहतम् ” इत्यादिना पंचाग्निविदामपि प्रकृतिमिश्रोपासकत्वं स्वयमाशंक्य “ तत्क्रतुन्याय संचारेण वाक्यार्थनिर्णये पूर्वोक्त सर्वदोषपरिहारसम्भवात् ” इति समाधान मुपक्रम्य “ यदिपुनः पंचाग्निविदः प्रकृतिविमिश्रं ब्रह्मात्मकत्वाविशेषितं प्रत्यगात्मानमेव प्राप्यतयोपासीना इतीष्यते, नोपपद्यतएव तर्हि तेषां श्रूयमाणा ब्रह्मप्राप्तिरपुनरावृत्तिश्च, अनुपासितस्य ब्रह्मणः प्राप्त्ययोगात् । उपासितस्य प्राप्तस्य क्षरणशीलाचिन्मिश्र प्रत्यगात्मलक्षणप्राप्यस्य कदाचि त्क्षरणावश्यम्भावेन पुनरावृत्तेरवर्जनीयत्वाच्च ॥ अतः पंचाग्निविदः प्रकृतिवियुक्तं प्रत्यगात्मानं ब्रह्मात्मकमुपासीना इत्येव न्यायत स्सिध्यति ” इत्यभिहितं । तदसत् , यथाक्रतु न्यायस्य उपासितप्राप्त्यवश्यम्भाव मात्रोपपादकतया तादृशन्यायमाश्रित्य “ अनुपासितस्य ब्रह्मणः प्राप्त्ययोगात् ” इत्युक्ते रयुक्तेः । अनुगृहीतं ह्याचार्यपादैः - “ उपासितगुणादे र्या प्राप्ताव प्यबहिष्क्रिया । सा तत्क्रतु नयग्राह्या नाकारान्तरवर्जनम् ” इत्युपायविभागाधिकारे ॥

इद मत्रावधेयम् – " यथाक्रतुरस्मिन्लोके पुरुषो भवति तथेतः प्रेत्य भवति " इति श्रुतेः यद्रूपप्रकारको पासनावा न्पुरुष स्तद्रूपप्रकारक प्राप्तिमा नित्यर्थः । " यो धूमवा न्स वह्निमान् " " यद्द्रव्यं यद्द्रव्यध्वंसजन्यं तत् तदुपादानोपादेयं " इत्यादाविवयत्तच्छब्द घटितवाक्यार्थयोः क्रमेणव्याप्यव्यापकभावप्रतीतेः उपासन प्रकारताव्यापकं प्राप्तिप्रकारत्व मित्येतावदेवलभ्यते, नतुउपासन प्राप्तिप्रकारतयो स्समनैयत्यमपि । तत्रापि "यत्क्रतुः पुरुषस्तदितः प्रेत्यभवति " इत्युपेक्ष्य यथातथोपादान बलादुपासनायां यदंशेयस्य प्रकारत्वं प्राप्तावपितदंशेतस्य प्रकारत्वमावश्यकमिति गम्यते । तथाच उपासनत्व विशिष्टमुपासनत्वमिति तद्वाक्यार्थ ऽनिष्कर्षः । वैशिष्ट्यंच स्वसमानाधिकरण भेदप्रति योगितावच्छेदकत्व सम्बन्धावच्छिन्न स्वनिष्ठावच्छेदकताक प्रतियोगिताक भेदवत्त्व सम्बन्धेन । स्वाधिकरणता आश्रयतासम्बन्धेन । भेदप्रति योगितावच्छेदकताच स्वाश्रयविशिष्टत्वसम्बन्धेन । विशिष्टत्वंच – स्वसमानाधिकरणभेद प्रतियोगितावच्छेदकत्व सम्बन्धावच्छिन्न स्व निष्ठावच्छेदकताक प्रतियोगिताक भेदवत्त्व स्वतादात्म्योभय संबन्धेन । तत्र स्वाधिकरणता स्वनिरूपित प्रकारतात्वसम्बन्धेन । भेदप्रतियोगितावच्छेदकताच स्वप्रयोज्य प्राप्तिप्रकारताविशिष्टत्व सम्बन्धेन । प्रकारतावैशिष्ट्यश्च स्वसामानाधिकरण्य स्वनिरूपितविशेष्यतासमानाधिकरण विशेष्यतानिरूपित त्वोभयसम्बन्धेनेति । उपदर्शितं श्रुत्यनुसारेण च " तं यथा यथोपासते तथैव भवति " इति श्रुतौ एवकारस्य क्रियया सहान्वयांगीकारा त्तत्तद्रूपप्रकारकोपासनावत स्तत्तद्रूपप्रकारक प्राप्त्ययोगव्यवच्छेदमात्रमेव " ज्ञानमर्थं गृह्णात्येव " इत्याद्येव कारवादादिप्रदर्शित स्थलइव प्रतिपाद्यते । नतु – एवकारस्या न्ययोगव्यवच्छेदपरतया तत्तद्रूपातिरिक्तरूप प्रकारक प्राप्तिव्यवच्छेदः । उपासनानां प्रतिनियत गुणकतया प्राप्तेश्च उभयविभूतिविशिष्ट ब्रह्मविषयकतया अन्ययोगव्यवच्छेदानुपपत्तेः ।

एवकारस्या न्ययोगपरतावश्यकत्वेपिं वा ब्रह्मप्राप्तिसर्वविषयकत्वा नुरोधेन उपासितप्रकारविरोधि प्रकारव्यवच्छेदकरण स्वीकरणमेव युक्तम् । अयं धनवानेव भवतीत्यादौ धनविरोधि दारिद्रयव्यवच्छेदकरणवत् ॥ अतएवच – " स यथा सैन्धव घनोऽनन्तरो ऽबाह्यः कृत्स्नोरसघनएव एवं वाय मात्मानन्तरो ऽबाह्यः कृत्स्नः प्रज्ञानघनएव विज्ञानघनएव " इत्यत्रावधारणस्य न ज्ञानत्वातिरिक्त सर्वाकारव्यावर्तकत्वं, येन अपहतपाप्मत्वाद्याकारोपि मुक्तस्य व्यावर्त्येत । अपितु ज्ञानत्वविरोधि जडत्वाकार व्यावर्तकतैवेति ब्राह्माधिकरणे भाषितम् । एतेन – " यः पुनरेतं त्रिमात्रेणोमित्यनेनैवा क्षरेण परं पुरुषमभिध्यायीतसतेजसि सूर्ये सम्पन्नो यथा पादोदर स्त्वचाविनिर्मुच्यत एवं हैवपाप्मना विनिर्मुक्त स्ससामभिरुन्नीयते ब्रह्मलोकं सएतस्माज्जीवघनात्परात्परं पुरिशयं पुरुषमीक्षते" इति वाक्य मधिकृत्य " अत्र ध्यायतीक्षति शब्दावेकार्थविषयौ, ध्यानफलत्वा दीक्षणस्य । यथाक्रतुरस्मिन्लोके पुरुष इति न्यायेन ध्यानविषयस्यैव प्राप्यत्वात " इति भगव द्भाष्यकार भाषणस्यापी क्षति कर्मा धिकरणस्थस्य संगतिः । तत्रा प्येवकारस्य ध्यानविषय विरोधिनि प्राप्यत्वयोग व्यवच्छेद – परत्वात ॥ ईक्षतिकर्मणः परमात्मत्वं व्यवस्थाप्यजीवस्य ध्यानकर्मता पूर्वपक्ष प्रवर्तनपराणां परेषां निरसनायहि " अत्र " इत्याद्युपदर्शितभाष्य मवतारितं टीकायाम् । तथाच सति जीवस्य ध्यानकर्मत्वे तत्प्राप्ते रवश्यंभावेन तद्विरोधिपरमात्मस्वरूपस्य परमते प्राप्यत्वासम्भवेन ईक्षतिकर्मत्वानुपपत्तिरिति ध्यायतीक्षत्यो रेककर्मकता मास्थायैव पूर्वपक्षप्रवर्तन मुचितमिति भाष्यकाराशय स्साधु संगच्छते इति ॥ तथाच उपासनविशिष्टा प्राप्तिरिति तत्क्रतुन्यायनिष्कर्षः । वैशिष्टयंच स्वसमानकर्तृकत्व स्वप्रकारताव्यापक प्रकारताकत्वस्वप्रकारविरोधिरूप प्रकारकत्वसम्बन्धावच्छिन्न स्वनिष्ठावच्छेदकताकप्रतियोगिताकभेदवत्त्वत्रितयसम्बन्धेन । पूर्वोक्तानुगमेतु स्वप्रयो

त्वप्राप्तीत्यत्र स्वविशिष्टप्राप्तीति निवेशनीयम् । प्राप्तौ स्ववैशिष्ट्यंच स्वप्रयोज्यत्व स्वप्रकारविरोधिप्रकारकत्व सम्बन्धावच्छिन्न स्वनिष्ठाव- च्छेदकताक प्रतियोगिताकभेदवत्त्वोभयसम्बन्धेनेति बोध्यम् । उपा- सितगुणादेरिति संग्रहसूक्तावपि आकारान्तरवर्जन मित्यस्य आका- रान्तरसामान्यवर्जन मित्यर्थो बोध्यः । अतः विरोधिरूपात्मकाकारा न्तरवर्जनस्य तत्क्रतुनयेविवक्षितत्वेपि नविरोधः ।

यत्तूक्तम् प्राचीनैः – उपासनविषयेतरगुणानामपि प्राप्यत्वांगी- कारे" व्यतिरेक स्तद्भावभावित्वा" दिति सूत्रविरोधः । तत्र प्राप्यत्वे- नोपास्यत्वसाधना त्तदनुपपत्तेः, प्राप्यत्वस्योपास्यत्वव्यभिचारात् इति । तत्रोच्यते – नतावद्व्यतिरेक स्तद्भावेत्यत्र सांसारिकस्वरूपव्यतिरेके उपास्यत्वं प्राप्यत्वेन साध्यते, तथासति भावित्वादित्येतावतैव हेतु निर्देशेनोपपत्ते स्तद्भावभावित्वा दित्यधिकोपादानवैफल्यापातात । अ- तस्तद्भावभावित्वा दित्यस्य तद्रूपापत्ते स्तद्रूपभावनायां सत्या मवश्यं भावित्वादित्येवार्थः । तथाच सांसारिकं रूपं नोपास्यं अप्राप्यत्वादि- त्येवानुमान मत्र विवक्षितम् । तत्रच विपक्षे बाधक स्तर्कः तद्भा वभावित्वादिति तत्क्रतुन्यायानुरोधेन उपासिताकारस्य प्राप्त्य- वश्यंभावेन अनुपास्यत्वरूपसाध्याभावे अप्राप्यत्वरूपहेत्वनुपपत्ति रित्य- भिप्रायगर्भम् । तदेवं सांसारिकरूपस्या नुपास्यत्वे सिद्धे आवश्यके च किंचिद्रूपेण भाने प्रत्यगात्मनः परिशेषा त्सांसारिकरूपव्यतिरेक पुरस्कारेणैव प्रजापतिवाक्योपात्तेना न्तरंगाकारेण प्रत्यगात्मन उ- पासनं सिद्ध्यतीति सांसारिकरूपव्यतिरेकस्या र्थादेवोपास्यत्वमिति हि तत्सूत्राशयः । अन्वयश्चास्य सूत्रस्येत्थम् । व्यतिरेकः सांसारिकरूप व्यतिरेकः उपास्यः । नतु सांसारिकं रूपं उपास्यम् । तद्भावभावित्वात्- तद्रूपभावनायां सत्यां तद्रूपप्राप्ते रवश्यंभावित्वात् , सांसारिकरूपस्य मुमुक्षुप्राप्यत्वप्रसंगात् । उपलब्धिवत् – यथायथावस्थित ब्रह्मस्वरूपानु- सन्धानेन यथावस्थितब्रह्मस्वरूपप्राप्ति र्नत्वयथावस्थित ब्रह्मानुसन्धानेन,

विरोधात्, एवं यथावस्थितात्मप्राप्तिरपि यथावस्थितानुसन्धाने सत्युपपद्यते, नत्वयथावस्थितात्मप्रतिसन्धाने इति। तदेवं सूत्रोपात्ते नत्वित्यंशएव तदुपात्तपंचम्यर्थान्वया दत्रत्यभाष्यमप्यनयैव दिशा योजनीयम्। तदित्थं सूत्रार्थवर्णन प्रकारमनुजगृहुः स्पष्टमाचार्याः– शरीरेभावाधिकरणे – "तत्कालाकारिणःस्यादहमिति भजने कंचुकस्यात्मनोधीरासत्तेर्मामुपस्स्येत्युदितवदितिचेन्नान्यथा सन्निकर्षात्। शुद्धोह्यात्मात्र साध्यः फलमतिरविनाभाविनीबोध्दकृत्ये बुद्ध्यासन्नेन्तरंगेसति विधिनियता तत्क्रतुन्यायसिद्धिः" इति। तत्क्रतु नीतिशरीरे समव्याप्ति विवक्षातुनयुज्यते, उभयविभूति विशिष्टनिखिलगुणक ब्रह्मण एव सर्वत्र प्राप्यतया विद्यानांच नियतविशेषणक ब्रह्मगोचरतया समव्याप्त्यसंभवादित्यपि व्यक्तमुक्तमाचार्यैः – "कर्तुर्भोक्तृत्वंमात्रं गणयितुमुचितंदृष्टभोगार्थयत्ने स्वर्गाद्यर्थस्य देहानुगतिरपिपरं स्वाधिकारानुविद्धा। मुक्त्यर्थेप्राप्त्यवस्था प्रणिधिकथनतस्तत्क्रतुन्यायवाचा चिन्त्यस्य प्राप्यतार्थोगमितइति कुतोतिप्रसंगादिशंका॥ विद्याभेदेषु वेद्याकृतिविषमतया यावदुक्तेविचिन्त्ये प्राप्यंसर्वोपपन्नं ततइहकथमप्राप्य चिन्तानिषेधः। तस्माच्छुद्धस्य चिन्तास्त्विति नकलुषितोनह्यहंशब्दमुख्यः प्राजापत्यात्तु वाक्यादकलुषदशया भावनीयत्वसिद्धि" रिति।

यदपि – उपासनविषयता समव्याप्तप्राप्तिविषयताकत्वस्य तत्क्रतुन्यायार्थत्वेपि नोक्तानुपपत्तिः, अनन्तत्वस्य सर्वोपासन प्रकारतया आनन्ददयः प्रधानस्येति सूत्रसिद्धत्वेन सर्वशरीरकत्वानन्तगुण वत्त्वादिरूपवस्त्वपरिच्छेदघटितत्वेन ब्रह्मोपासनसामान्ये गुणादीनां सर्वेषां सामान्यतो विषयत्वेन मुक्तिकालीनसाक्षात्कार विषयत्वस्य तेषु सत्वेपि समनैयत्या विद्यातादिति तैरेवोक्तम्। तदिदं स्वकार्येनैव लक्षणवादेन विरुद्धम्। तत्रहि सर्वशरीरकत्वस्या पृथक्सिद्धिसम्बन्धावच्छिन्नाभावाप्रतियोगित्वरूपतया नानन्तत्व मादाय सर्ववस्तुघटितत्वं सत्यत्वादिलक्षणस्येति स्वयमेवाभिहितम्। एवं वस्तु

परिच्छेदराहित्यस्य निरतिशयगुणवत्त्वरूपतायामेव व्याख्यातॄणां निर्भरः । तत्रापिच नतादृशगुणसामान्यनिवेशः, तथासति सत्यज्ञानपदाभ्यां व्यावर्तनीययो रनन्तत्वेनैव व्यावृत्त्यापत्तेः । अपितु संकल्पविशिष्टहेयगुणाभाव निरूपितनिरवच्छिन्नाधारत्वाभावरूपस्यैव नित्यमात्रव्यावर्तकस्यैकस्य गुणस्ये त्यभिहितम् । तदिदं अनन्तत्वस्य सर्ववस्तुघटितत्व सर्वगुणघटितत्वाभिधानेन तत्क्रतुन्यायवादगीतेन विरुद्ध्यत इति स्पष्टमेव ॥ किञ्च समव्याप्तिविवक्षायां धात्वप्रत्ययबलात् प्राप्तौ यद्यदंशे यस्य यस्य प्रकारत्वं उपासनेपि तत्तदंशे तस्य तस्य प्रकारत्वमिति विवक्षणीयम् । तदिदं उपासने अनन्तत्वघटकतया सामान्यरूपेण सकलगुणभानेपि नोपपद्यते , प्राप्तौ तत्तद्गुणांशे विशेषरूपाणामपि प्रकारत्वात् , उपासनेच तदभावात् ॥ वस्तुतस्तु – अनन्तत्वस्य स्वरूपगुणविभूतिप्रयुक्तापकर्षविरहरूपताया श्रुतप्रकाशिकान्यायसिद्धाञ्जनादावन्तत स्सिद्धान्तिततया नसर्ववस्तूनां न वा सर्वगुणानां तत्र घटकतेत्यवधेयम् । तस्मा त्प्राप्तिविषयताया मुपासनविषयताव्याप्यत्वविवक्षण मनुपपन्नमेव ॥ किञ्च – देव्या उपायत्व मंगीकुर्वतां मते प्राप्यत्वस्य पर मंगीकारेण देव्यां तद्गुणादिनिष्ठ प्राप्तिविषयतायामुपासनविषयताव्याप्यत्वभंगो दुर्वार एव ।

एतेन – अत्र व्यापकतायाः प्राप्तिविषयतात्वरूप सामान्यधर्मावच्छिन्नायाः व्याप्यताया श्चोपासनप्रयोजक प्राप्तीच्छाविषयतासामानाधिकरण्यविशिष्टप्राप्तिविषयतात्वरूप विशेषधर्मावच्छिन्नाया विवक्षणे उपासितगुणेत्यादि वदतां वेदान्ताचार्याणां तात्पर्या न्न तदुक्तिविरोधः । तत्तद्विद्या समानविषयक साक्षात्काररूप तत्तद्विद्यावेद्यप्राप्तीच्छयैव तत्तद्विद्यासूपासकानां प्रवृत्तेः, विद्यान्तरवेद्यगुण मादाय वटसमानकालीनत्वा द्युदासीनधर्म मादायैववा उभयविभूतिविशिष्टब्रह्मप्राप्तिविषयताया उपासनविषयताव्याप्यत्व भंगापादनासम्भवादित्यपि निरस्तम् । फलेच्छाया एव उपायप्रयोजकत्वेन विद्यान्त

वैकल्पिकत्वानुरोधेन तत्तद्विद्यावेद्यप्राप्तिमात्रफलकत्वानुपपत्त्या उभय विभूतिविशिष्ट निखिलगुणक ब्रह्मप्राप्तित्वरूपैकधर्मावच्छिन्नफलक ताया एवावश्यस्वीकार्यतयो पासनप्रयोजक प्राप्तीच्छाविषयताया अपि प्राप्तिविषयतावत केवलान्वयितया व्याप्यत्वभंगा परिहारात । स्फुट तरं चेदं गुणोपसंहारपादोपोद्घाताधिकरणसारावल्याम् – "निस्सीमा नन्दनाडिन्धमनिरुपधिकानन्तसम्पद्गुणौघे विद्याभेदै र्विभज्य प्रणि धि रिह यदि प्राप्ति रप्यंशत स्स्यात् । मैवं तैरेव धर्मै स्तदितर सहितैः पूर्णकामस्य पूर्णं प्राप्यं ब्रह्मैव नान्यत्किमपि फल मत स्त- त्क्रतुन्यायसिद्धः ॥ " इति । अत्र " पूर्णकामस्य पूर्णं प्राप्यं ब्रह्म " इत्यनेन उपासनप्रयोजककामनाविषयतायाः प्राप्तिविषयतायाश्च केव लान्वयित्वं स्फुटीकृत्य तत्क्रतुन्यायशरीरे उपासनविषयताव्यापकत्व मात्र तद्व्याप्यत्वघटनासम्भवश्च व्यञ्जितम् । उपायविभागाधि कारोप उपायभूतज्ञानस्य नियतविषयकत्वं प्राप्तेश्च सर्वविषयकत्वं चाभिधाय तत्र तत्क्रतुन्यायविरोधशंकापरिहाराय उपासितेत्यादिसंग्रह स्समारब्धः । तदेवं स्थिते वेदान्ताचार्याणां तत्क्रतुन्यायशरीरे सम व्याप्तिविवक्षण एव तात्पर्याभिधानं तदीयपूर्वोत्तरसन्दर्भापर्यालोचन निबन्धनमेव ॥ तस्मा त्तत्क्रतुन्यायशरीरे साधकलेशविरहात बाधकशतसद्भावाच्च नोपासनविषयताव्याप्यत्वं प्रविष्ट मित्यवधेयम् । अधिकं तत्क्रतुन्यायतत्त्वे प्रपंचित मस्माभिः ॥ इत्थं चानुपासितस्य ब्रह्मणः प्राप्तचयोगा दित्युक्ति र्युक्तिविकलैव ॥

अथैवं सति " अप्रतीकालम्बनानि"ति सूत्रेत्र तत्क्रतुन्यायोदाहरणं कोपयुज्यत इति चेत " तद्य इत्थं विदु र्ये चेमे रण्ये श्रद्धातप इत्युपासते " इति पंचाग्निविद्यानिर्दिष्टयो र्द्विविधयो रुपासकयो रप्र तीकालम्बनत्वसाधन एवेति गृहाण । अनुगृहीतंहि व्यासार्यैः – पंचा- ग्नीति भाष्यप्रतीक मुपादाय " तत्र प्रतिपन्नयो रुभयो रप्यप्रतीकाल- म्बनत्वं साधयितुं सूत्रकार स्तत्क्रतु श्रुत्युक्तवा नित्यर्थः " इति ।

अयमाशयः – इहतावदर्चिरादि गतिर्ब्रह्मप्राप्तिश्च निश्शेषाविद्यानिवृत्तिनियतेति तावदविवादं, सापिच निश्शेषाविद्यानिवृत्तिः " तमेवविदित्वाति मृत्युमेति " इत्यादि श्रुत्यनुसाराद्ब्रह्माविदुषो नसम्भवति , अतः पञ्चाग्नि विदामप्याम्नाता अर्चिरादि गति ब्रह्मप्राप्त्यपुनरावृत्तय एव ब्रह्मवित्त्वन्तेषां कल्पयन्ति । इत्थंच ब्रह्मोपासकानां पंचाग्निविदां यथाक्रतुन्यायेनावश्यंभाविनी ब्रह्मप्राप्ति स्तत्साधननिश्शेषाविद्यानिवृत्तिहेत्वर्चिरादिगति स्तत्साध्या ऽपुनरावृत्तिश्चेति सर्वमुपपद्यते, इति । " स्पष्टं चेदं तत्रैव – " तद्यइत्थं विदुर्येचेमेरण्ये श्रद्धातप इत्युपासते " इत्यत्र पंचाग्निविद्यानिर्दिष्टस्यार्चिरादि गतिश्रवणादर्चिरादिनागतस्यब्रह्मप्राप्त्यपुनरावृत्तिश्रवणाच्च फलस्यच यथोपासनभावित्वादर्चिरादिना ब्रह्मप्राप्तिफलोपासननिष्ठो ब्रह्मोपासक एवेति "। अत्र पंचाग्निविद्यानिष्ठो ब्रह्मोपासकः निश्शेषाविद्यानिवृत्ति फलकगतिफलकोपासननिष्ठत्वा दुपकोसलादि विद्यानिष्ठवदित्यनुमानं " श्रवणाच्च " इत्यन्तेन हेतुद्वयेनविवक्षितं । "ब्रह्मप्राप्तेश्च लिंगंगतिरियमनघासूत्रिता पूर्वमेव " इत्याचार्य श्रीसूक्तावयमेवार्थस्स्पष्टः ॥ " भावित्वात " इत्यनेनच पंचाग्निविद्यानिष्ठो ब्रह्मप्राप्त्यवश्यंभाववान् ब्रह्मोपासकत्वादिति यथाक्रतुन्यायोपष्टब्धानुमानमूला श्रुतब्रह्मप्राप्त्याद्युपपत्तिर्विवक्षिता । नचात्रश्रुतप्रकाशिकायां यथोपासनपदे पदार्थानतिवृत्त्यर्थकेन यथापदेनाव्ययीभावस्य स्वीकार्यतया उपासनानतिरिक्तविषयकत्वमेव प्राप्तौ लभ्यत इति वाच्यम् , योग्यतार्थकेनैवेह यथापदेनाव्ययीभावस्वीकारेण उपासनानुगुण्यमात्रस्यैव प्राप्तौ लाभात् । अन्यथा अनुपपत्तिशतप्रसंगस्य प्रागेवाभिहितत्वात । योग्यतावीप्सापदार्थानतिवृत्तिसादृश्यानि यथार्था इतिहि वैयाकरणाः ।

तदेवं पंचाग्निविदां ब्रह्मोपासकत्वे सिद्धे तेषामितरविद्यानिष्ठवद्ब्रह्ममुख्यविशेष्यकोपासननिष्ठत्वे " तद्य इत्थं " इति प्रथङ्निर्देशानुपपत्त्या ब्रह्मप्रकारकत्वमेव तदुपासनस्य कल्प्यते । तत्रापि जी-

चित्यास्वात्मकत्वसम्बन्धेन ब्रह्मणःप्रकारत्वं श्रुतप्रत्यगात्मांशे इति ॥ तदिदमपिव्यक्तं टीकायां – " तद्यइत्थं विदुर्येचेमेरण्ये श्रद्धातपइत्युपासत " इति विभागान्यथानुपपत्त्या स्वात्मविशिष्टब्रह्मोपासनं ब्रह्मात्मकस्वात्मोपासनं चेति कल्प्यं ब्रह्मप्राप्त्यानुगुण्यात् पृथङ्निर्देशावैयर्थ्याच्च " इति ॥ एवं यथाकार्योपासकस्य तत्क्रतुन्यायेन कार्यप्राप्तेरावश्यकतया तद्विरोधिनित्यप्राप्त्य पुनरावृत्त्योःस्वीकारे तत्क्रतुन्यायविरोधात्कार्योपासक परत्वं नास्त्युक्तश्रुतेः, तथैव पंचाग्निविदामब्रह्मात्मकस्वात्मोपासकत्वेपि आत्मत्वाधिकरणोक्तरीत्या तत्क्रतुन्यायेन तथाविधात्मप्राप्तेरावश्यकतया ब्रह्मप्राप्त्यपुनरावृत्तिस्वीकारे तत्क्रतुन्याय विरोधप्रसंगा दब्रह्मात्मकस्वात्मोपासकपरतापि तच्छ्रुतेर्नयुज्यते, इत्यनयापि रीत्यात्र तत्क्रतुन्यायोपयोगो बोध्यः । तदिदं सारे स्पष्टं –कार्यपक्षे तत्क्रतुन्यायश्च विरुद्ध्यते । अर्चिरादिनागतानांहि ब्रह्मप्राप्तिरपुनरावृत्तिश्च श्रूयते, पञ्चाग्निविदस्तु प्रकृतिवियुक्तात्मस्वरूपं यआत्मनितिष्ठन्नित्यादिनावगत ब्रह्मात्मकत्व मुपासत इतिह्यप्रतीकालम्बनत्वं तत्क्रतुन्यायाविरोधश्चेति ॥ तथायमर्थो गीताभाष्येपिस्पष्टः –आत्मयाथात्म्यविदः परमपुरुषनिष्ठस्यच सएनान्ब्रह्मगमयतीति ब्रह्मप्राप्तिवचना दचिद्वियुक्त मात्मवस्तु ब्रह्मात्मकतया ब्रह्मशेषतैकरसमित्यनुसन्धेयं । तत्क्रतुन्यायाच्चेति । " अन्यथा तत्क्रतुन्यायविरोध इत्याह तत्क्रतुन्यायाच्चेति " इति तात्पर्यचन्द्रिकाया मेतद्वाक्य प्रतीकावतारणेपि तत्क्रतुन्यायविरोधः प्रागुक्तरीत्या पञ्चाग्निविदा मब्रह्मात्मक स्वात्मानुसन्धायितायां बोध्यः । अतएव भूमविद्याप्रकरणाम्नातप्राणोपासकस्या ब्रह्मात्मकस्वात्मोपासकत्वेपि विरोधविरहान्न ब्रह्मात्मकस्वात्मोपासकत्वं कल्प्यते इत्यवधेयं । यद्यपि – ब्रह्मैवाविदुषः प्राणोपासकस्य अब्रह्मात्मकत्वेन स्वात्मोपासनमसम्भवि, तथापि अब्रह्मात्मकत्वस्य-स्वप्रतिष्ठितत्वपर्यवसिततया नानुपपत्तिः । लोकेद्विजात्यादयः पदार्था द्रव्यपरतन्त्रतया द्रव्यापृथक्सिद्धत्वेनैवभासन्ते । द्रव्यन्तु स्वप्रतिष्ठि-

त्त्वेनैव । तत्रान्यपरतन्त्रताया लोकतो नवगमतात् । ब्रह्मविदान्तु सर्वस्यैव शास्त्रतो ब्रह्मात्मकत्वावगमा त्सर्वं द्रव्यमपि ब्रह्मपरतन्त्र तया ब्रह्मा पृथक्सिद्धत्वेन भासते, नस्वप्रतिष्ठिततया । स्पष्टं चेदं प्रकृत्यधिकरणटीकायां " यत्रत्वस्य सर्व मात्मैवाभू त्तत्केन कं पश्येत् " इति श्रुतिविवरणावसरे । तथाच पदार्थानां सर्वत्र स्वतन्त्रतया वा किञ्चि त्परतन्त्रतया वा भान मिति द्वय्येव गति रिति स्थितिः । तत्सिद्धं प्राणोपासको ऽब्रह्मात्मक स्वात्मानुसन्धायीती त्यलम् । इत्थंच पंचाग्निविदां ब्रह्मोपासकत्व मस्मदुक्तरीत्यैव साधनीयं, नभव दुक्तरीत्या । तत्क्रतुन्यायस्या चार्यै रन्यथैव शिक्षितत्वा दित्यवधार्यताम् ।

एतेन पंचाग्निविदामपि ब्रह्मप्राप्तिश्रवणेपि पंचाग्निविद्भिः प्रकृतिवियुक्तत्वविशिष्ट प्रत्यगात्मनः परब्रह्मोपासकैः परब्रह्मणश्च प्रधानप्राप्यतयोपासनेन तत्क्रतुन्यायेनैव प्राप्यभेदसिद्ध्या प्रधानप्राप्यभेद निबन्धन मुपासकभेद मभिप्रेत्य गतिशास्त्रे गन्तॄणां द्वेधा विभज्य निर्दिशोपि सुसंगतो भवति - इत्यपि निरस्तम् । ब्रह्मात्मकस्वात्मो पासकस्यापिं तथाविधप्राप्येन साकं स्वात्मशरीरकपरिपूर्ण ब्रह्मप्राप्तौ विरोधविरहेण कथंचिदपि तत्क्रतुन्यायेन प्राप्यभेदासिद्धेः ॥ " तद्य इत्थं विदुः " इत्यादौ उपासकानां भेदेन निर्देशस्तु ब्रह्ममुख्यविशेष्य कत्व प्रत्यगात्ममुख्यविशेष्यकत्व रूपोपासनाकारभेदमात्रेणैव सार ग्रन्थादिप्रदर्शितेन उपपन्नो नप्राप्यभेदमपि साधयितुं प्रभवेत् । यदि पुन रत्र प्राप्यभेदोपि विवक्षितो ऽभविष्य त्तदा उपासकभेदवत्सोपि निर्दिष्टो ऽभविष्यत् । उपासकभेदमात्रनिर्देशात्तु प्राप्याभेद एव सिध्यति । अन्यथा गतिभेदो गमकगणभेदोपि प्रसज्येतेति विभावनीयम् ।

यदपि - नचायं द्विधा निर्देश उपासनाकारभेदमात्रायत्ताधिकारि द्वैविध्यपरस्तुवचः , तथा सति विद्याना मनेकविधत्वेन अनेक विधत्वस्यैव गन्तॄणां वक्तव्यतया द्विविधत्वकथना ऽसामञ्ज स्या दिति । तदप्यसत् विद्यानां वेद्याकारभेदेनानेकविधत्वेपि ब्रह्मप्रत्य

गात्म मुख्यविशेष्यकत्वाभ्यां द्वैविध्यस्यैव सम्भवेन मुख्यविशेष्य भेदकृताकारभेदतात्पर्येणैव द्विधा निर्देशोपपादने बाधकाभावात् ।

इदमत्र तत्रभवन्तः प्रष्टव्याः -- उपासकद्वैविध्य निर्देशोपपादनायैव प्राप्य द्वैविध्यकल्पने द्विविधानामुपासकानां प्राप्यभेदे किं नियामकमिति । उपासनाकारभेद एवेतिचेत् ? हन्तैवंसति उपासनाकाराणा मनन्तविधत्वा त्प्राप्यस्याप्य नन्तविधत्वमेव स्यात , नभवदुक्तं प्राप्यद्वैविध्यमात्रं । नवा तन्मूलतयोपासकद्वैविध्य निर्देशस्य श्रौतस्योपपत्तिः । अथमुख्यविशेष्यभेद कृतोपासनाकारभेद एव प्राप्यभेदनियामकः, सच द्विविधएवेतिनोक्तदोष इतिचेत ? एवं सत्यश्रुतं प्राप्य भेदं परिकल्प्य तस्योपासकद्वैधनिर्देशोपपादकत्वकल्पनापेक्षया प्राप्य भेदनियामकत्वेन भवदभिमतस्य मुख्यविशेष्यभेदकृतोपासनाकारभेद स्यैवतन्निर्देशोपपादकत्वांगीकारेलाघवात्, " तद्धेतोरेव तद्धेतुत्वेमध्ये किन्तेन " इति न्यायात् । नखल्वेवं प्राप्यभेदे श्रुतौ स्मृतौ इतिहासे पुराणे भगवच्छास्त्रे भगवद्भाष्यकारादिसूक्तौवा किंचित्प्रमाण मुपलभामहे । विनापि प्रमाणं प्राप्यभेदपरिकल्पने गतिभेदो गमकार्चिरादिगणभेदादिरपिच कल्पनीयस्स्यादितितुप्रागेवावेदितमितिदिक् ।

अतएव -- " यएवमेनं जानन्ति येचारण्यकमाश्रिताः । उपासतेतपस्सत्यं श्रद्धया परयायुताः । क्रमात्तेसम्भवन्त्यर्चि रहश्शुक्लं तथोत्तरम् । अयनं देवलोकंच सवितारं सवैद्युतं । तत्र तत्पुरुषो दिव्यो ऽमानवो ब्रह्मलौकिकान् । करोति पुनरावृत्ति स्तेषामिह न विद्यते । " इति याज्ञवल्क्य स्मृतावप्युपदर्शित च्छान्दोग्य श्रुत्युपबृंहण भूतायां प्राप्यैक्यमेव निर्दिश्यते ॥

यत्तु --गीतायां द्वादशाध्यये –" एवं सततयुक्तादे इत्यादि सप्तश्लोकी पंचाग्निविद्यानिर्दिष्ट द्विविधाधिकारिपरेति , तत्तूपहास्यमेव, द्वादशाध्यायोपक्रमोदितस्याक्षरयोगस्य प्रथमषट्कोदिताक्षरयोगरूपतया पंचाग्निविद्यानिर्दिष्टाक्षरयोगरूपत्वा सम्भवात् । पंचाग्निविद्या

निर्दिष्टाक्षरयोगो मध्यमषट्कोदितोभगवद्भक्तिमुखभेदरूपतया भगवद्भक्तितुल्यफलः । द्वादशाध्याये अथैतदप्यशक्तोसीति श्लोकव्याख्यायां "ततोऽक्षरयोगमात्मस्वभावानुसन्धानरूपं परभक्तिजननं पूर्वषट्कोदितमाश्रित्य तदुपायतया सर्वकर्मफलत्यागं कुरु" इत्यत्र पूर्वषट्कोदितस्याक्षरयोगस्य भक्तिजनकत्वोक्त्या मध्यमषट्कोदितस्य तस्य भक्तिरूपताया भाष्यकारैराविष्करणात् । स्पष्टं चेदं तत्रैव श्रीमत्तात्पर्य चन्द्रिकायां - "अक्षरयोगस्याप्यव्यवधानेन मोक्षोपायत्व व्युदासाय परभक्तिजननमित्युक्तं । सप्रकाराक्षरयोग प्रत्यभिज्ञापनार्थं मध्यमषट्कोदिताक्षरयोगव्यवच्छेदार्थंच पूर्वषट्कोदित मित्युक्त" इत्यत्र । "एतेनाध्यायारम्भे येचाप्यक्षरमव्यक्तमित्युक्ताक्षरयोगोपि अक्षरसाक्षात्कारद्वारापरभक्तिमुत्पाद्य परमात्मप्राप्तौ विश्राम्यतीति सिद्धं । सएवह्यत्रापि प्रथमषट्कोक्तोक्षरयोगः प्रस्पष्टं" इत्यत्रच । अतएव द्वादशाध्यायावतारभाष्ये "अनन्तरमात्मप्राप्तिसाधनभूतादात्मोपासनाद्भक्तिरूपस्य भगवदुपासनस्य स्वसाध्यनिष्पादने शैघ्र्यात्सुसुखोपादानत्वाच्चश्रैष्ठ्यं भगवदुपासनोपायश्च, तदशक्तास्याक्षरनिष्ठता तदपेक्षिताश्चोच्यन्ते" इत्यनेन द्वादशाध्यायोदिताक्षरस्य भक्तियोगाशक्ताधिकारिकतया प्रथमषट्कोदिताक्षरयोगरूपत्वं व्यञ्जितम् ।

एतेन - पंचाग्निविदा मुपासनस्य ज्ञानयोगरूपत्वमेव न भक्तियोगरूपत्वं इत्यप्यसमञ्जसं वेदितव्यम् । भक्तियोगरूपत्वाभावे तस्य तद्वतां ब्रह्मप्राप्तिश्रवणानुपपत्तेः "भक्त्या त्वनन्यया शक्य अह मेवं विधो ऽर्जुन । ज्ञातुं द्रष्टुंच तत्त्वेन प्रवेष्टुंच परंतप ॥" "भक्त्या त्वनन्यया वापि प्रपत्त्या वा महामुने । प्राप्योहं नान्यथा प्राप्यो मम कैंकर्यलिप्सुभिः ॥" इत्यादि स्मरणात् । यातु क्षणमात्रविश्लेषासहत्वप्रयुक्तभगवत्प्राप्तित्वरा सा पुनः पंचाग्निविदां नाभ्युपगम्यते । कैवल्यव्यवहितभगवत्प्राप्तिकामत्वा त्तेषाम् । तदपि च कैवल्य मर्चिरादिगतेः पूर्वमेव वा तन्मध्ये वेत्यन्यदेतत् । उक्तं चेदं तात्पर्य-

चन्द्रिकायाम् - " यथाच मुमुक्षोरेव कस्य चिन्मध्ये ब्रह्मकाय निषेषणसुख मुच्यते, तथात्रापि स्थानविशेषे स्वात्मानुभवविलम्बः । यथाच - ' अथवा नेच्छते तत्र ब्रह्मकायनिषेवणम् । उत्क्रामति च मार्गस्थ श्शीतीभूतो निरामय" इत्यादिना ब्रह्मकायनिषेवणसङ्गान्मुक्तस्य देवयानेन मार्गेण परमाकाशगमन मुच्यते , तद्वदिहापि स्वात्मानुभवस्थानात्प्रच्युतस्य परमव्योमाधिरोह स्स्यात् । अर्चिरादिगतिश्चास्यावान्तरफळा त्पश्चाद्वा गतिमध्येवा दक्षिणायनमृतस्य चन्द्रमसस्सायुज्यवद्विश्रममात्ररूपो य मवान्तरफळानुभव इत्युभयथापि नविरोधः " इत्यादौ । एतेन - ब्रह्मविद्यानिष्ठस्य शरीरपातानन्तरं लोकान्तरे फळान्तरानुभवविळम्बो नयुज्यते , " स एनान् ब्रह्म गमयति " इत्यादिकाया श्श्रुते स्तदानीमेवा व्यवधानेन ब्रह्मप्राप्तिप्रतिपादकत्वात " तस्य तावदेव चिरं याव न्नविमोक्ष्ये अथ संपत्स्ये " इति छान्दोग्यश्रुतेरपि विद्यानिष्ठस्य मोक्षप्राप्ते देहपातमात्रावधिविळम्ब प्रतिपादकत्वात् , फळान्तरानुभवविळम्बासम्भवात् - इत्यप्य साम्प्रदायिकभाषणं वेदितव्यम् । मधुविद्यानिष्ठस्यान्तरा वस्वादि पदप्राप्त्य नुपपत्तेः , " स एनान् " इत्यादौ अव्यवधानबोधकशब्दाभावात् । " तस्य तावदेव " इत्यस्या अपि श्रुतेः प्रारब्धकर्ममोक्षमात्रपरताया " भोगेन त्वितरे क्षपयित्वा " इति सूत्रभाष्यादावेव स्पष्टीकृतत्वाच्च ।

यदपि - स्वापेक्षयोत्कृष्टपूज्यविषयकप्रीति रूपापन्नोपासनस्यैव भक्तिरूपत्वेन स्वात्मानुसन्धानरूपे पंचाग्निविदुपासने भक्तिरूपत्वं नकथंचिदपि सम्भवति , इति । तदप्यसत , ब्रह्मात्मकत्वविशिष्टस्वात्मोपासनस्य प्रत्यगात्मांशे भक्तिरूपत्वासम्भवेपि तद्विशेषणीभूतब्रह्मांश एव भक्तिरूपताया निर्बाधत्वात ॥ यथाहि स्वात्मशरीरकब्रह्मोपासनस्य ब्रह्मांश एव भक्तिरूपता नस्वात्मांशेपि तथा ब्रह्मात्मकस्वात्मोपासनस्यापि पंचाग्निविद्यारूपस्य ब्रह्मांश एव भक्तिरूपतायां नकिंचिद्बाधकम् । मुखभेद स्त्वकिंचित्कर इति " उभयेपि हि " इत्यादि सारग्रन्थ एव व्यक्तम् ।

अतएव "मध्यमे भगवत्तत्त्व याथात्म्या वाप्तिसिद्धये । ज्ञानकर्माभिनिर्वर्त्यो भक्तियोगः प्रकीर्तितः । " इति गीतार्थसंग्रहसंगृहीत भक्ति योगपरताके मध्यमषट्के पञ्चाग्निविद्यानिर्दिष्टाक्षरयोगस्य कथनसंगतिः, विशेषणांशे भक्तिरूपत्वात । विशेषतोपि सप्तमाध्यायार्थ संग्रहे " स्वयाथात्म्यं प्रकृत्यास्य तिरोधिश्शरणागतिः । भक्तिभेदः प्रबुद्धस्य श्रैष्ठ्यं सप्तम उच्यते " इत्यत्रैश्वर्यार्थिजिज्ञासुज्ञानि कर्तव्य योगानां भक्तित्वरूपसामान्य धर्माक्रान्तत्वं विधिभेदमात्रंच सप्तमविवक्षितं स्पष्टीकृतम् । भगवतापि भाष्यकृता सप्तमाध्यायारम्भे " इदानीं मध्यमेन षट्केन परब्रह्मभूतपरमपुरुषस्वरूपं तदुपासनंच भक्तिशब्दवाच्य मुच्यते " इत्युपक्रम्य " उपासनन्तुभक्तिरूपापन्नमेव पर प्राप्त्युपायभूत मिति वेदान्तवाक्यसिद्धम् " इत्युपासनायास्तस्या भक्तिरूपतामभिधाय " तत्र सप्तमेतावदुपास्यभूतपरमपुरुषस्वरूपयाथात्म्यं प्रकृत्या तत्तिरोधानं तन्निवृत्तये भगवत्प्रपत्तिः उपासनविधाभेदः ज्ञानिनः श्रैष्ठ्यंचोच्यते । " इत्यनेन भक्तिरूपापन्नस्यैवोपासन स्यैश्वर्यार्थि जिज्ञासुज्ञानि रूपाधिकारिभेदेन विधाभेदमात्रं सप्तमे प्रतिपिपादयिषितमिति स्पष्टीकृतं । अष्टमाध्यायेपि " ऐश्वर्यार्थिनः कैवल्यार्थिनश्च स्वप्राप्यानुगुणं भगवदुपासनप्रकारउक्तः । अथज्ञानिनो भगवदुपासनप्रकारं प्राप्तिप्रकारश्चाह " इत्यनेन " अभ्यासयोगयुक्तेन " इत्यादेः " नित्ययुक्तस्ययोगिनः " इत्यन्तस्य ऐश्वर्याद्यर्थि रूपाधिकारिभेदाधिकृत भगवदुपासनप्रकारभेद्प्रतिपादनपरत्वं स्पष्टं भाषितं । एवं - "भक्तियोग स्तदर्थीचे त्समग्रैश्वर्यसाधनम् । आत्मार्थीचे त्त्रयोप्येते तत्कैवल्यस्यसाधकाः ॥ " इति गीतार्थसंग्रहे" अतिशयितैश्वर्यापेक्षाणा मात्मकैवल्यापेक्षाणाञ्च भक्तियोगस्तदपेक्षित साधनमितिचोक्तं " इति त्रयोदशोपक्रमभाष्येच पंचाग्निविच्छब्दित कैवल्यार्थ्युपासनस्य भक्तियोगरूपत्वं व्यक्ततरमभिहितं । तदिदं सर्वमेव कैवल्यार्थिशब्दित पंचाग्निविद्यानिष्ठगतोपासनाया भक्तिरूपत्वाभावे विरुद्ध्यते । यस्तु कैवल्यमात्रार्थी नतत्क-

र्तृकोपासने भक्तियोगरूपत्वनियमः । उक्तंचाचार्यै र्न्यायसिद्धाञ्जने कर्मयोग ज्ञानयोगावधिकृत्य " इमौचयोगौ कामनाभेदेन कस्यचि त्कैवल्यमात्रसाधकौ । यथा भगवदुपासनमेव कस्यचि दैश्वर्यादिकं साधयति " इत्यादि । इतिदिक् ।

यदपि - पंचाग्निविदां देशविशेषावच्छिन्न ब्रह्मप्राप्तिमन्तरेण निःशेषाविद्यानिवृत्तिलक्षण प्रकृतिवियुक्तत्व विशिष्टप्रत्यगात्म प्राप्तिरूप पंचाग्निविद्या पुरुषार्थासिद्ध्यापत्त्या तदर्थ तादृशब्रह्मप्राप्ते रावश्यकतेतिकल्पनं, तदप्यसत् तथासति ज्ञानयोगेनापि पूर्वषट्कोदितेन इहैव शुद्धात्मसाक्षात्कारानुदयापत्तेः । इष्टापत्तौ चेहैव शुद्धात्मसाक्षात्कारद्वारा ज्ञानयोगस्य भक्तियोगहेतुत्वं विलीयेत । तथाच- " उभयपरिकर्मितस्वान्तस्यैकान्तिकात्यन्तिक भक्तियोग लभ्यः " इत्यादि भगवद्यामुनमुनिभाष्यकारादि सूक्तिव्याहति प्रसंगः । तस्मा दयुक्तैः प्रकृतिसंसृष्टतयैव गृह्यमाणोपि जीवः ज्ञानयोगसंस्कृतात्मभिः प्रकृतिविविक्ततया शुद्धरूपेण साक्षात्क्रियत इत्यास्थेयं । अत एव प्रकृतिविविक्तत्वस्यास्य निश्शेषाविद्यानिवृत्तिलक्षणत्व कथनमप्ययुक्तं, अविद्यायाः कर्मरूपत्वेन प्रकृतिरूपत्वाभावात् । अतएव " द्वितीयस्य कर्माख्याविद्याविरहिणो चिद्वियुक्तस्य ज्ञानैकाकारस्य " इति पुराणवद्भाष्ये अविद्याविरहाचिद्वियोगयो स्सहोपादानमुपपद्यते । भाषितंहि पूर्वषट्कोदितज्ञानयोगनिष्ठस्यापि प्रकृतिवियुक्तात्मस्वरूपनिष्ठत्वं " स्वात्मनः परेषांच भूतानां प्रकृतिवियुक्तस्वरूपाणां ज्ञानैकाकारतया साम्या द्वैषम्यस्यच प्रकृतिगतत्वाद्योगयुक्तात्मा प्रकृतिवियुक्तेष्वात्मसु सर्वत्र ज्ञानैकाकारतया समदर्शनः " इत्यादिना षष्ठाध्यायैकोनत्रिंशश्लोकभाष्ये । प्रकृतिवियुक्त प्रत्यगात्मप्राप्ति रपि तस्य ज्ञानानन्दैकतानस्वात्ममात्रानुभव एव, नपुनर्निश्शेषाविद्यानिवृत्तिदेशविशेषप्राप्ति गर्भापीत्येतदपि स्पष्टीकृतं तत्रैवाध्याये चतुश्चत्वारिंशश्लोकभाष्ये - " योगमनुष्ठाय शब्दब्रह्मातिवर्तते, शब्दब्रह्मदेव

मनुष्यपृथिव्यन्तरिक्ष स्वर्गशब्दाभिलपनयोग्यं ब्रह्मप्रकृतिः । प्रकृति-सम्बन्धाद्विमुक्तो देवमनुष्यशब्दाभिलापानर्हं ज्ञानानन्दैकतानमात्मानं प्राप्नोतीत्यर्थः " इति । तस्मान्मध्यमषट्कोदितमक्षरयोगं भक्तियोग मुखभेदं पश्चाग्निविद्यासमाख्यातमास्थितस्याष्टमे " यःप्रयाति त्यजन्दे-हंसयाति परमांगतिं " इत्यत्राभिधीयमाना आनुषङ्गिकफलरूपा प्र कृतिवियुक्त स्वस्वरूपावस्थितात्मप्राप्तिरपि ज्ञानानन्दैकतानस्वात्म-मात्रानुभवरूपैवाश्रयणीया । तावन्मात्रेणैवच तादृशात्मरूपस्य मुक्त स्वरूपत्वाभिधान मष्टम " अव्यक्तोक्षर इत्युक्तस्तमाहुः परमांगतिं । यंप्राप्यननिवर्तन्ते तद्धामपरमं मम ॥ " इत्येतद्भाष्ये " मुक्तस्व-रूपं परमंधाम " इत्यत्र । स्पष्टंचेदं तत्रैवाध्याये त्रयोविंशश्लोकाव-तारे तात्पर्यचन्द्रिकायां - " स्मरन्तिच स्वात्मानुभवस्थानं मुक्तिस्था नादर्वाचीनं - " योगिनाममृतं स्थानं स्वात्मसन्तोषकारिणां । एकान्तिन स्सदाब्रह्मध्यायिनो योगिनोहिये । तेषान्तत्परमं स्थानं यद्वै पश्यन्ति सूरयः । " इति । अमृतस्थानवर्तिनांच मुक्तत्वव्यपदेशो जरामरणादि विरहात्पुनर्जन्महेतुभूतपुण्यपापविगमाच्च " इति । तादृशप्रकृतिवियु क्तात्मस्वरूपप्राप्तेः प्रधानफलदशाकालिकत्वेच तादृशाक्षरयोगनिष्ठप्रा-प्यस्य ज्ञानिप्राप्यभेदकथना संगतेः । " आत्मयाथात्म्यविदः परम-पुरुषनिष्ठस्यच साधारणीमर्चिरादिकां गतिमाह " इत्यादिना उभ-योरपि तयोः प्रधानफलभूत ब्रह्मप्राप्तयविशेषस्य त्रयोविंशश्लोकभाष्य एवस्पष्टं भाषणात् ।

यद्यपि - " नच पश्चाग्निविदामपि ब्रह्मप्राप्तिफलब्रह्मोपासननि-ष्ठत्वे ब्रह्मनिष्ठानाममीषांच कोविशेषः " इत्याशंक्य " ब्रह्मनिष्ठानां पुरुषार्थविधया प्राप्यत्वलक्षणस्य परमप्राप्यत्वस्य परस्मिन्ब्रह्मणि पं-चाग्निविदां तथाविधप्राप्यत्वस्य प्रत्यगात्मनिच स्वीकारेवैलक्षण्य सिद्धेः । अन्यथोभयेषां विभज्यनिर्देशासंगतत्वापाताच्च " इति स माहितं - तदपि अविशेषेणब्रह्मप्राप्ति श्रवणेसति तथा वैलक्षण्यस्वीकारे

प्रमाणाभावात्, विभज्य निर्देशस्यान्यथैवोपपत्तेः प्रागेवोपपादितत्वाच्च निरस्तं वेदितव्यम् ब्रह्मण स्स्वतोनिरवधिकपुरुषार्थत्वे पंचाग्निवित्प्राप्यत्वेचसति पंचाग्निविद्प्रति पुरुषार्थविधया प्राप्यत्वाभावस्य ब्रह्मणि दुरुपपादत्वाच्च । विशेषणविशेष्योभयसत्त्वे विशिष्टसत्त्वावश्यंभावात्। नच पंचाग्निविदाब्रह्मणः प्राप्यत्वेना प्रतिसन्धानान्नतत्र तंप्रति पुरुषेणेष्यमाणत्वरूपं पुरुषार्थत्वमिति वाच्यं, ब्रह्मात्मकस्वात्मरूपविशिष्टं प्राप्यं मत्वा उपासीने पुरुषे ब्रह्मधर्मिकप्राप्यत्व प्रतिसन्धानाभावस्यैव दुर्भणत्वात् । इयांस्तु विशेषः - यतः पंचाग्निवित् स्वात्मन्यव्यवधानेन प्राप्यत्वमनुसन्धत्ते मधुविद्यानिष्ठ इव वस्वादिपदप्राप्तिम् । ब्रह्मणितु तद्विशेषणीभूते तद्व्यवधानेन प्राप्यत्वमनुसन्धत्ते । सतु विशेषोभवता मकिंचित्कर एवेति । एवंविधविशेषकल्पनाच सप्तमाष्टमाध्यायगीता तद्भाष्याद्यनुरोधादुपपन्नत्वाच्च युज्यते, नपुनः प्रधानप्राप्यभेदकल्पनापि, अनुपपन्नत्वादि त्याम्रेडितमेवेति विभावनीयं सुधीभिः ।

यदपि-पंचाग्निविदामुपासने ब्रह्मणोब्रह्मनिष्ठोपासनेच प्रत्यगात्मनश्च विषयत्वेपि तयोस्तत्राप्रधानत्वात्प्रधानं यदुपासनं तदेव तत्र कर्मतया निर्देष्टव्यं प्राधान्यद्योतनायेत्याशयेनैव " तद्यइत्थं विदुः " इत्यत्र पूर्वोक्तपरामर्शिना तच्छब्देन प्रत्यगात्मनोवेदन प्रधानकर्मतया " श्रद्धतपइत्युपासते श्रद्धांसत्यमुपासते" इत्यत्र तपस्सत्यशब्दाभ्यां परब्रह्मणउपासनप्रधानकर्मतयाच श्रुत्यानिर्देशः क्रियते । स्मरतिच भगवान्पाणिनिः - कर्तुरीप्सिततमं कर्मेति क्रियया प्राप्तुमिष्टतमस्यैव कारकस्य मुख्य कर्मत्व-इति। तदपि कर्तुरीप्सिततममिति पाणिनिसूत्रार्थापर्यालोचन मूलकमेव । " कर्तुरीप्सिततमं कर्म " इत्यत्राहि अग्नेर्माणवकं वारयतीत्यादौ संयोगानुकूल व्यापाराभावानुकूल व्यापाराद्यर्थक वारयत्याद्यर्थप्रविष्टगुणभूतव्यापारजन्य संयोगादिरूप फलभागित्वप्रकारक माणवकेच्छाविषयस्य अग्न्यादेः वारणार्थानामीप्सित इति निहितापादानसंज्ञाकस्य कर्मताप्रसंगवारणाय तमब्ग्रहणं

स्वार्थकयद्भिः वैयाकरणैः प्रकृतधात्वर्थप्रधानभूत व्यापारप्रयोज्य प्रकृतधात्वर्थफलाश्रयत्वेनोद्देश्यत्वं कर्तु रीप्सिततमत्व मिति परिष्कृतम् । उपास्यादिधातूनांच वारयत्यादिवद्यदि प्रधानाप्रधानव्यापारद्वयबोधकत्वं स्यात् स्यादपि तदा वारयत्यादियोग इव तद्योगेपि ईप्सित तमस्यैवं कर्मत्वं नत्वीप्सितस्यापीति वक्तुम् । तत्त्वतस्तु समीक्षा यां ज्ञानवाचकधातूनां फलावच्छिन्नव्यापारवाचकतैव नास्ति, प्राकट्यादे स्सिद्धान्ते ऽनंगीकारेण विषयगतस्य ज्ञानजन्यफलस्यैव दुरुपपादत्वात । अत एव विषयतावादे घटं जानातीत्यादौ अनुयोगितानिरूपकसंयोगरूपाविषयतैव द्वितीयार्थः प्रतियोगितासम्बन्धेन ज्ञानान्वयीत्युक्तम् । तथाच सविषयकार्थक धातुसमभिव्याहारे विषयतारूपमेव कर्मत्व मिति विषयतायाश्च विशेष्यप्रकारसाधारण्येन कथमुपासनायां विशेषणविशेष्यभावापन्नयोः परब्रह्मप्रत्यगात्मनो रेकस्य प्रधानकर्मत्व मन्यस्य तदभावः प्रतिपाद्यते प्रदर्शितसूत्रावष्टम्भेन ॥ यदितु – ज्ञानार्थकधातुसमभिव्याहारे मुख्यविशेष्यतारूपं विषयत्वमेव प्रधानकर्मत्वं, प्रकारतारूपन्तु तदप्रधानकर्मत्व मिति स्वैरं कल्प्यते, तदापि तत्र कर्तुरित्यादि पाणिनिसूत्रोदाहरण मनवधानकारणकमेव । तादृशप्राधान्याप्राधान्यानुपपादकत्वा त्तत्सूत्रस्य ॥ किञ्च – " तम ब्ग्रहणं किम् ? पयसोदनं भुङ्क्ते " इति प्रतीके शब्देन्दुशेखरे अवयव द्वारा समुदायस्य प्रश्नः कर्तु रुद्देश्यं कर्मत्येवास्त्विति भावः, पयसोदनमिति यदा कृतभोजनो ऽपि पयोलाभेन ओदनभोजने •प्रवर्तते तदेदं प्रत्युदाहरणम्, तत्क्रियायाः पय उद्देश्यकत्वात । ईप्सिततम शब्दस्यतु क्रियाशब्दत्वात् पयस स्तदा फलाश्रयत्वेन अविवक्षणात नदोष इति भावः " इति ग्रन्थे प्रधानप्राप्यवाचकात् पयः पदादपि द्वितीया नदृश्यते । अप्रधानप्राप्यवाचकौदनपदादपि द्वितीया दृश्यते क्रियाजन्यफलाश्रयत्वेन वक्तृविवक्षाया एव कर्मसंज्ञादिप्रयोजकत्वादिति स्पष्ट मवगम्यते । तथाच कथं तद्य इत्थं विदुः इत्यादौ द्वि-

त्तीयानिर्देशमात्रेण तत्प्रकृत्यर्थस्य प्रधानप्राप्यत्वादिकं परिकल्प्यते । तस्मात् " तद्य इत्थं विदुः " इत्यत्र प्रत्यगात्मविषयकोपासना 'ये चेमे ऽरण्ये ' इत्यादौ परब्रह्मविषयकोपासनाच शब्दात् प्रथमं प्रतीयते । तत्र च प्रमाणान्तरेण इतरेतरोपासनयो रितरेतरविषयविषयकत्वावश्यम्भावे ऽवगते सति तद्वाक्ये तत्तद्विषयकत्वेन निर्दिष्टयो रुपासनयोः तत्तन्मुख्यविशेष्यकोपासनरूपत्वं परिकल्प्यते । अन्यथा विभज्य निर्देशासंगते रित्येव सारम् ।

एतेन इत्थं पंचाग्निविदामपि स्वोपासनेन ब्रह्मणः प्राप्तु मिष्टत्वे ऽपि प्रत्यगात्मन एव प्राप्तु मिष्टतमत्वम् । ब्रह्मनिष्ठानांच प्रत्यगात्मनो ऽपि 'एक आत्मन श्शरीरे भावात्' 'आत्मेतितूपगच्छन्ति ग्राहयन्तिच' 'अविभागेन दृष्टत्वात' इत्याद्यधिकरणेषु उपास्य प्राप्यकोटि निविष्टताया निर्णीततया स्वोपासनेन प्राप्तु मिष्टत्वे ऽपि प्राप्तु मिष्टतमत्वं परस्यैव ब्रह्मण इति दुरपह्नवमेव प्राप्यवैलक्षण्यम् , इत्यपि परास्तम् । प्राप्तु मिष्टतमत्वस्यैव इतरव्यावृत्तस्या निरूपणात् प्रकृतधात्वर्थप्रधानव्यापारजन्य फलभागित्वप्रकारकेच्छाविषयत्वरूपं तु कर्तुरित्यादिसूत्रोक्तं ब्रह्मणो ऽप्यसम्भवि, सर्वेष्वेवोपासनेषु ब्रह्म प्रत्यगात्मोभयसाधारणमेव चेत्यवधार्यताम् ।

यदपि – अप्रतीकालम्बनानित्यत्र अप्रतीकोपासकान् इत्यनुक्त्वा उपासकपदस्थाने आलम्बनपदप्रयोगात् प्राप्यतया प्रतीक मुद्दिश्योपासकाः सर्व एव प्रतीकालम्बनशब्देन गृह्यन्ते , प्राप्यतया प्रतीकोपासकत्वस्यैव प्रतीकालम्बनत्वरूपत्वात् । इत्थंच प्राप्यबुद्ध्या प्रतीकं प्रापकबुद्ध्या अन्यञ्चोपासीनाः प्राप्यबुद्ध्या प्रापकबुद्ध्या च प्रतीक मेवोपासीना श्चेत्युभयविधा अपि अप्रतीकालम्बनशब्देन गृहीता भवन्ति ' इति । " तदप्यसत् , आलम्बनपदस्य प्राप्यत्वार्थकतायां उपासनार्थकतायांच प्रमाणविरहस्य प्रागेवोक्ततया तत्पदोपादान बलेन प्राप्यतयोपासकलाभस्यासम्भवात् । आलम्बनपदंहि समूहालम्ब

नादिशब्दप्रयोगानुरोधेन विषयमात्रवाचकम् । अत एव " विश्वो पादानतत्त्वं स्वय मिह चिदचिद्विग्रहैर्वा विशिष्टं यस्या मालम्बन सा भवभयशमनी वीतरागस्य विद्या । " इत्यादौ विषयमात्रपरं प्रयुज्यते । प्रसिद्धश्च आलम्बनसंशीलन मालम्बनविभाव इत्यादिरपि विषयपरतया तत्प्रयोगः । व्याख्यातश्च श्रीविष्णुचित्तार्यैः " साधनालम्बनं ज्ञानं मुक्तये योगिनां हि यत । तदालम्बनविज्ञानं द्वितीयोंशो महामुने ॥ " इत्यादौ विष्णुपुराणप्रथमांशद्वाविंशाध्याये विषयपरतयैवालम्बनशब्दः । प्रकृतेच प्रतीकं आलम्बनं विषयो येषामिति बहुव्रीहौ स्वसमवेतोपासननिरूपितत्वस्य विषयित्वान्वयिनः बहुव्रीह्यर्थसम्बन्धतया विवक्षणात् प्रतीकविषयकोपासनवतां प्रतीकालम्बनपदेन लाभ स्सुवचः । प्रतीकालम्बनोपासनाना मित्युपदर्शितटीकाप्रयोगस्तु स्पष्टत्वाय स्वनिरूपितत्वरूपसाक्षात्सम्बन्धस्यैव बहुव्रीह्यर्थसम्बन्धतया विवक्षणाभिप्रायकः । अतस्तत्र उपासनपदस्य अधिकस्योपादाने ऽपि नक्षतिः । श्रीमति भाष्येपि " नतद्योगयुजा शक्यं नृप चिन्तयितुं द्विज । द्वितीयं विष्णुसंज्ञस्य योगिध्येयं परं पदम् ॥ इति वैष्णवपुराणश्लोकार्थानुवर्णनपरे "द्वितीयस्य कर्माख्याविद्याविरहिणः अचि द्वियुक्तस्य ज्ञानैकाकारस्य अमूर्ताख्यविभागस्य निष्पन्नयोगिध्येयतया योगयुङ्मनसो ऽनालम्बनतया स्वत श्शुद्धिविरहाच्च शुभाश्रयत्वं प्रतिषिध्य " इत्यादिसन्दर्भे विषयमात्रपरतयैव आलम्बनपदं प्रयुज्यते । किंच प्राप्यतया प्रतीकोपासकत्वस्यैव प्रतीकालम्बनपदार्थत्वे भूमविद्याप्रकरणोक्तनामाद्युपासकानां प्रतीकोपासकत्वेन सर्वसम्प्रतिपन्नानां प्रतीकालम्बनत्वानुपपत्तिः, तत्रहि नामादेः प्रतीकस्य नप्राप्यतयोपासनम् " सयो नाम ब्रह्मेत्युपास्ते यावन्नाम्नो गतं तत्रास्य यथाकामचारो भवति । " इत्यादिफलवाक्येषु यथेष्टसंचरणादिरूपकामचारादेरेव प्राप्यत्वावगमात् , नाम्नः प्राप्यत्वाभावात् । नच नामाद्युपासकानां कामचारादिरूपफलप्राप्यत्वप्रतिसन्धान मादायैव प्रतीको

पासकत्व मुपपादनीयमिति वाच्यम्, तथा सति " प्रतीकालम्बनादिना मनामादिप्राणशब्दनिर्दिष्ट प्रत्यगात्मस्वरूपपर्यन्तं सर्वं चिदाचिद्वस्तु जातं ब्रह्मदृष्ट्या स्वरूपेणवा य उपासतेते " इत्यादेः भगवद्भाष्य कारीयस्य प्रतीकालम्बनादिपदविवरणस्य असंगत्यापत्तेः । भवद्रीत्या तत्र कामचारादिकं प्राप्यतया ये प्रतिसन्दधते ते इत्यादिरीत्यैव तत्पदार्थविवरणस्य करणीयत्वप्रसंगात् ।

वस्तुतस्तु - फलस्य उपासनप्रयोजक प्रतिसन्धानविषयत्वेपि नोपासनविषयत्वमावश्यकमिति उत्तरत्र वक्ष्यते । तथाच कामचारादि प्राप्यत्वप्रतिसन्धान मादाय प्रतीकोपासकत्वप्रतिपादनमसमञ्जसमेव । परमार्थतस्तु - विशेषश्चदर्शयतीति सूत्रे " यावन्नाम्नोगतं तत्रास्य यथाकामचारो भवतीत्यादिका श्रुतिर्नामादि प्राणपर्यन्त प्रतीकमुपासी-नानां गत्यनपेक्षं परिमितफलविशेषंच दर्शयति " इति भाष्येनामादी नामेव प्रतीकत्वं भाषितं । स्वेनापितत्सूत्रार्थवर्णन दशायामनूदितोय मर्थइति स्ववचनव्याहतमे वेदं कल्पनमिति दिक् ।

एतेन " यदिपुनः प्रतीकोपासकपदमिहस्यात् तदा स्वरसतोऽ संकोचेन प्राप्यतया प्रापकतयाच प्रतीकमुपासीनानामेव बोधस्स्यात् तथा सति दृष्ट्युपासकव्यतिरिक्ताना मर्वाचीनैश्वर्यार्थिना मातिवाहि-कनेयत्व निषेधो नसम्भवतीति तादृशपदोपेक्षा । इत्यपि निरस्तम् । आलम्बनपदस्य प्राप्यत्वघटितार्थकता विरुद्धस्योक्तत्वात् । सत्त्वेवा तस्याः मात्रपक्षाद्यनुपादानेन एवंरीत्याऽसंकोचन्यायस्य तत्रापि प्रवृत्ते-र्निर्निरोधतया प्राप्यत्वेन प्रापकत्वेनच प्रतीकमुद्दिश्योपासीनानामेव बो-धस्य दुर्वारतया आलम्बनोपासकपदयोः एकतरोपासनविशेषस्य दुर्नि रूपत्वाच्च । नामादिब्रह्मदृष्ट्युपासकेष्वपि कामचारादेरेव प्राप्यतया प्रतिसन्धानात् प्राप्यतया नामाद्युपासकत्वा सम्भवस्यैवोक्ततया दृष्ट्यु पासकव्यतिरिक्तानामिति विशेषोक्ते रसंगतत्वाच्च । अथैवंसति प्रती-

कोपासनपद मुपेक्ष्य प्रतीकालम्बनपदोपादाने सूत्रकृतः किं बीज मिति चेत्, न किंचिदन्तरेणेच्छा मशोकवनिकान्यायेनेति गृहाण। न चात्रानयोः पदयो रक्षरलाघव मप्येकत्र दृश्यते, येन तद्बीजान्वेषण मावश्यकं स्यात्। आहुश्च वैय्याकरणाः "पर्यायपदानां लाघव गौरवचर्चा नाद्रियते" इति, लाघवैकदत्तदृष्टयोपि पर्यायपदेषु गुरु भूतेष्वपि सूत्रोपात्तेषु लघुभूतपदान्तरानुपादानकारणान्वेषणानादरण मिति। यदि पुनः तत्र किंचिद्बीजं वक्तव्य मेवेत्या गृह्यते, तदा प्रतीकत्व मप्रतीकत्वं वा विषयगतमेव नोपासकगतं नवोपासनगत मिति स्पष्टीकर्तु मेव विषयवाचकालम्बन पदसामानाधिकरण्य मा-श्रितम्। प्रतीकोपासनपदोपादाने हि प्रतीकपदस्य कर्मधारय भ्रान्त्या उपासिना उपासकपदेन वा सामानाधिकरण्यभ्रान्ति स्स्यात इति तथाविधभ्रान्तिनिराचिकीर्षैव शिष्यानुजिघृक्षोः आचार्यस्य प्रती-कोपासकपदोपेक्षा बीज मिति परिकल्प्यताम्। इति दिक्।

एतेनैव – " उपासनवाचिपदस्यासति बाधके प्राप्यतया प्रापक तया च स्वसमभिव्याहृतकर्मवाचि पदार्थगोचरोपासनपरत्व मेवा संकोचन्यायेन स्वरससिद्धम्। अत एवोक्तं प्रतीकाधिकरणभाष्ये – प्रतीकोपासनं हि नाम ब्रह्मणि ब्रह्मदृष्ट्यानुसन्धान मिति। ब्रह्म दृष्ट्यनुसन्धानं चात्र ब्रह्मणः प्राप्यत्वेन प्रापकत्वेन चाभिसंहितस्य दृष्ट्यानुसन्धानरूपं सत्प्राप्यप्रापकविधया प्रतीकानुसन्धान रूप मेव पर्यवस्यति" इत्यादिक मप्यभित्तिचित्रपरिकल्पन मित्यवगन्तव्यम्। उपासनपदस्य तथाव्युत्पत्तिकल्पनायामेव प्रमाणाभावात्। " एव मैश्वर्यार्थिनः कैवल्यार्थिनश्च स्वप्राप्यानुगुणं भगवदुपासनप्रकार उक्तः" " उद्गीथाद्युपासनानि कर्मसमृद्ध्यर्थान्यपि ब्रह्मदृष्टिरूपाणि ब्रह्मज्ञानापेक्षाणीतीहैव चिन्त्यन्ते" इत्यादि गीताभाष्य श्रीभाष्या-दिप्रयोगेषु प्रतीकालम्बनादि पदार्थविवरण परभाष्यवाक्यगतप्रयो-गेषु चा नैकान्त्याच्च। तत्र तत्र भगवदुद्गीथनामादीनां प्राप्यत्व

प्रतिसन्धानाभावात् । अत एव प्राप्यतया प्रापकतया चोपासन बुबोधयिषायां " तेषां ज्ञानी नित्ययुक्त एक भक्ति र्विशिष्यते " इत्यादौ प्राप्याभिन्नत्व तात्पर्यक मेक पद मुपादीयते ॥ एवं – ब्रह्म दृष्टयनुसन्धानस्य प्राप्यप्रापक विधया प्रतीकानुसन्धान पर्यवसानक-थनमप्ययुक्तमेव, तत्र तत्र ब्रह्मपदादीनां श्रुतौ प्रापकत्वादि गौणतया अयुक्तत्वात्, " येतु ब्रह्मकार्यान्त र्भूतनामादिकं वस्तु देवदत्तादिषु सिंहादि दृष्टिवत ब्रह्मदृष्टया केवलंवा तत्तद्वस्तूपासते" इतिभाष्ये दृष्टान्ते सिंहत्वादि दृष्टेरिव दार्ष्टान्तिकेपि ब्रह्मत्व दृष्टेरेव विवक्षणावश्यकत्वाच्च ॥ अत एव – " अब्रह्मणि ब्रह्मत्वेनदृष्टि र्ब्रह्मदृष्टिः, ब्रह्मदृष्टि रूपत्वा द्ब्रह्मज्ञानसापेक्षाणीत्यर्थः " इति श्रुतप्रकाशिकायां ब्रह्मत्वदृष्टिरित्येव विवृता ब्रह्मदृष्टिः । किञ्च प्राप्यतया प्रापकतया च प्रतिसन्धानस्यैव ब्रह्मदृष्टिरूपत्वे उद्गीथाद्युपासनानां ब्रह्मज्ञानसापेक्षता भाषणं तन्मूलक ब्रह्मकाण्ड विचार्यत्व समर्थन भाषणंच व्याहन्यते, इत्यलम साम्प्र-दायिक भाषणगत दूषणगवेषणेन ॥ तस्मात्प्रतीकोपासन प्रतीकालम्ब नादि पदार्थतावच्छेदक कोटौप्राप्यत्व घटनाविरहेण ब्रह्मात्मकत्व विशेषणविनिर्मुक्त ब्रह्मात्मक वस्तूपासनमेव प्रतीकोपासनादि पदार्थः प्रागस्माभि श्श्रुति भाष्यादि प्रयोग स्वारस्येनोप दर्शित स्स्वीकार्यः। तत्र प्रतीकालम्बन पदविवरण भाष्ये ब्रह्मदृष्टया उपासनं ब्रह्मप्रकारका भेदसंसर्ग कोपासनं ब्रह्मत्वप्रकारका श्रयता संसर्गकोपासन मेतवा, स्वरूपेणोपासनंस्वासाधारण रूपमात्र प्रकारकोपासनं, ब्रह्मत्व ब्रह्मात्मकत्वान्यतरा प्रकारक मुपासन मित्येवा र्थोग्राह्यः । " प्रती कोपासनंनाम " इत्यादि प्रतीकाधिकरणभाष्ये वस्तुत एकदेशस्य ब्रह्मात्मकत्वेना गृहीतस्य ब्रह्मसामानाधिकरण्यव्यपदेशानर्हत्वात् ब्रह्म भिन्नत्वाभिधानं ब्रह्मात्मकत्वा गृहीत तात्पर्यकमेव । तथाच प्रकृ त्यधिकरणभाष्ये " अविभक्तनामरूपं कारणावस्थं ब्रह्मैव प्रकृतिशब्देना भिधीयते ब्रह्म व्यतिरिक्त वस्त्वन्तराभावात् " इति भाषणं " ब्रह्म

व्यतिरिक्त वस्त्वन्तराभावात - युतसिद्ध वस्त्वन्तराभावा दित्यर्थः" इति टीकाग्रन्थश्च परिदृश्यते । अधिकं प्रागेवोक्त मस्माभि रितिदिक् ।

नन्वेव मप्यैश्वर्याद्यर्थं भगवन्त मुपासीनस्य प्रतीकालम्बन पदार्थत्वानुपपत्तिः, भगवत उपास्य भूतस्य प्रतीकपदार्थत्वा सम्भवा दिति चेन्मैवं; तस्य भगवन्तमादाय प्रतीकालम्बनत्वा सम्भवेपि तदुपासने प्राप्यतया प्रतिसंहितस्य भोग्यजातस्य प्राप्तृतया प्रतिसं हितस्य स्वात्मनश्च ब्रह्मात्मकत्वेन प्रतिसंहितत्वाभावात प्रतीकपदार्थत्व सम्भवेन तादृशं प्राप्यं प्राप्तारंचादाय प्रतीकविषयकोपासन वत्तया प्रतीकालम्बनत्वोपपत्तेः । यदित्र तत्रापि ब्रह्मात्मकत्वं प्रतिसन्धीयेत तदातथोपासकस्य ब्रह्मप्राप्तौ विश्रमावश्यकतया नेष्यत एव प्रती कालम्बनत्वं । अत एवानुगृहीतम् - "ब्रह्मात्मकस्वात्मानुसन्धानेतु ब्रह्मप्राप्तौ विश्रमाद पुनरावृत्तिरिति विशेषः" इति तात्पर्यचन्द्रि- कायान् । यदिच - शास्त्रावधृत जगद्ब्रह्म तादात्म्यानामपि कर्म वैचित्र्य कृतरुचिविशेषवशा दैश्वर्यमात्रार्थिनां यद्भगवदुपासनं तस्या प्रतीकोपासनत्वापत्ति र्दुर्वारा । नच तत्रा ब्रह्मात्मकत्वेन कस्यचि द्भानं ब्रह्मात्मकत्वानुपरागो वासंभवति, शास्त्रावधृत जगद्ब्रह्म तादा त्म्यकत्वा त्तदुपासनकर्तुः । अतएव " यथैश्वर्यसाधिका भक्तिरपव र्गोपाय भक्तिभ्योभिद्यते यथाच कर्मस्वरूपाविशेषेपि नित्यकाम्यज्यो तिष्टोमभेदः " इतिन्यायसिद्धांजने ऐश्वर्यार्थ मोक्षार्थ भक्त्योस्स्वरूपा विशेषःफलकामना विशेषकृत प्रयोगमात्र भेदश्चानुगृहीतस्संगच्छते । नचैश्वर्यमोक्षरूप फलविषयकत्वेन तयोस्स्वरूपविशेषो दुर्वार इति वाच्यम् । तत्तत्फलप्रतिसन्धानस्य तदुपाय प्रवृत्तिप्रयोजकत्वेपि उपा यभूतभक्तेः फलविशेषावगाहित्वे मानाभावात् । तथा चैषा मैश्वर्या- र्थ भगवदुपासकाना मप्रतीकालम्बन पदार्थत्वापत्ति रित्युच्यते । तदा इष्टापत्तिरेवात्र वक्तव्या । अप्रतीकालम्बनानिति सूत्रेतु स्वोपा स्य वस्तुकामानिति विशेष्यवाचकं पदान्तरं पूरणीयं, अत स्तेषामे-

श्वर्यार्थिनां नार्चिरादिनेयत्वप्रसक्तिः । उपदर्शित भक्तिस्वरूपाविशेष प्रतिपादकप्रमाणाद्यनुसारादेवं पदाध्याहारोनदोषाय । अप्रतीकालम्ब-नानित्यस्मिन्व्यावर्त्यमाने आलम्बनपदस्य विषयसामान्यवाचिनोपि बहुव्रीहिबलात् प्राप्तिकामनाविषयपरतामाश्रित्य अप्रतीकपदार्थभूत विशिष्ट ब्रह्मप्राप्तिकामनावद्रूपविशेष्यलाभसम्भवा त्तत्पदाद्वयस्यैवोपपत्तौ पदान्तरं नैवपूरणीय मित्यलंपल्लवितेन ।

एतेन अंगंप्रतीको ऽवयवइत्यादिकोशेन अंगपर्यायः प्रतीकशब्दो गिस्थानीय प्राप्यादर्वाचीन प्राप्योपलक्षकः । यद्वा-बृहदारण्यके तृतीयाध्याय पञ्चमब्राह्मण प्रथमखण्डिकास्थस्य " सोन्तमत्तिप्रतीकेन " इतिमन्त्रखण्डस्य विवरणभूतेन तदीय द्वितीयखण्डिकास्थेन " सोन्न मत्तिप्रतीकेन प्रतीक म्मुखं मुखेनेत्येतत् " इति ब्राह्मणेनप्रतीकशब्दस्य मुखशब्देन द्वारपरतयाव्याख्यानात्, तथा तत्रैवाष्टमाध्याय द्वितीयब्राह्मण तृतीयखण्डिकायां " इम इतिहि प्रतीकान्युदाजहार " इति प्रश्नप्रतिपत्तिद्वार भूततत्परवर्णावळीपरतया प्रतीकशब्द प्रयोगाच्च द्वारिस्थानीय परब्रह्मलक्षणप्राप्यमुखस्थानीय तदर्वाचीन प्राप्योपलक्षणो भावितुमर्हतीत्यसौशब्दः पक्षद्वयेपि परमप्राप्यादर्वाचीन प्राप्योपलक्षक एवायं भवति - इतिप्रतीकपदार्थ कल्पनाक्लेशोप्यपास्तः । ' सोन्नमत्तिप्रतीकेन " इत्यादि श्रुतेः अवयवसामान्यवाचक प्रतीकपदस्यैव योग्यताद्यनु-सारान्मुखरूपावयवपरता प्रदर्शकतयोपपत्तेः । तीर्थसामान्यवाचकस्यापि तीर्थशब्दस्य तीर्थयात्रांगत इत्यादौ तीर्थविशेषवाचकतायाः प्रणयनाधिकरणेशबरस्वामिना भाषणात् । " इमइतिहि प्रतीकानि " इति श्रुतावपि एकदेशपरतयैव प्रतीकपदोपपत्ते स्तथैवोपनिषद्भाष्ये भाषणाच्च क्वचिदपि प्रयोगेप्रतीकपदस्य कोशोपदर्शितार्थ विलक्षण द्वारत्वावच्छिन्नवाचकत्व कल्पनानावश्यकत्वाच्च । तस्मात् प्रतीकपदेन परम प्राप्यादर्वाचीनोपलक्षणं तत्पदवृत्ते रतीवदवीयः । भवतुवा तथोपलक्षणं - तथापि प्रकृतिवियुक्तप्रत्यगात्मनोपि परमप्राप्यभूत परब्रह्मावधि

कापकर्षवत्त्वेन परमप्राप्यादर्वाचीनतया तदुपासकानां पंचाग्निविदांप्रती काळम्बनत्वापत्तिर्दुर्वारा ।

यत्वेतद्दोषपरिहाराय – " इद मत्रावधेयम् " इत्यादिना परम प्राप्यस्य भगवत इव नित्यविभूतिप्रकृतिवियुक्त प्रत्यगात्मनोरपि ब्रह्मप्राप्तिगर्भ स्वप्राप्तिकत्वा त्परमप्राप्यत्वं वेदार्थ संग्रहसूक्त्युदाहरणेन स्थापितम् – तत् तावतापि प्रतीकपदस्य परमप्राप्या दर्वाचीनपरत्वे परमप्राप्यभूत परब्रह्मानधिकापकर्षवत्त्वस्य प्रत्यगात्मन्यक्षततया तदुपासकपंचाग्निविदां प्रतीकालम्बनत्वव्यावृत्त्यसम्भवादेव निरस्तम् । परमप्राप्यत्वावच्छिन्नावधिता कार्वाचीनत्व विवक्षाया मप्युपासा त्रैविध्यन्यायेन ब्रह्मोपासकाना मपि अचिद्विषयकोपासनवत्तया प्रतीकाळम्बनत्वापत्तिः प्रागेवास्माभि रुक्ता दुरुद्धरैव ।

यदपि – " वेदार्थसंग्रहे भगवत्प्राप्तिं निमित्तीकृत्य त्रयाणां परम प्राप्यत्वं प्रतिपादयतां भाष्यकृता मिदं तात्पर्यं, यस्मि न्प्राप्ये प्राप्ते सर्वस्मा त्परं तत्त्वं न प्राप्तं भवति पश्चा त्प्राप्तव्यतयैव चावशि- ष्यते, तदेव च प्रतीकशब्दवाच्य मर्वाचीनप्राप्यं, यस्मि न्प्राप्ते सर्वस्मा त्परं तत्त्वं प्राप्त मेव भवति पश्चा त्प्राप्तव्यतया च नाव शिष्यते तत्परमप्राप्यमेव " इत्युपक्रम्य " त्रितयसाधारण मिह विवक्षितं परमप्राप्यत्वं च स्वप्राप्त्युत्तरकालप्राप्तव्य स्वोत्कृष्टप्राप्यक भिन्नप्राप्यत्वं स्वप्राप्त्युत्तरकालं प्राप्तव्यत्व स्वोत्कृष्टत्वोभय सम्बन्धाव- च्छिन्नाधेयतासम्बन्धेन प्राप्यविशिष्टान्यप्राप्यत्वपर्यवसितम् – इत्यभि- हितम् तदिदं स्वोदाहृत वेदार्थसंग्रहसूक्तिविरुद्ध मेव । तत्र हि " त्रीण्यप्येतानि परमप्राप्यत्वेन परमपदशब्देन प्रतिपाद्यन्ते । कथं त्रयाणां परमप्राप्यत्व मिति चेत् भगवत्स्वरूपं परमप्राप्यत्वा देव परमपदशब्दवाच्यम् । इतरयो रपि भगवत्प्राप्तिगर्भत्वा देव परम पदत्वम् । सर्वकर्मविनिर्मुक्तात्मस्वरूपावाप्ति र्हि भगवत्प्राप्तिगर्भा "

इत्यनेन परमप्राप्यत्वस्यैव परमपदशब्दप्रवृत्तिनिमित्तत्व मुच्यते । तत्र साक्षा त्सम्बन्धेन परमप्राप्यत्ववत्त्वा द्भगवतः परमपदशब्द बोध्यत्वं " भगवत्स्वरूपं " इति वाक्येनाभिहितम् । इतरयोस्तु नित्यविभूति सर्वकर्मविनिर्मुक्तात्मस्वरूपयोः स्वाश्रयप्राप्ति नियत प्राप्तिकत्वरूपपरम्परासम्बन्धेन परमप्राप्यत्ववत्त्वात् तत्पदबोध्यत्वं " इतरयो रपि " इत्यादिवाक्येना भिहितम् । तथाच स्वाश्रयत्व स्वाश्रयप्राप्तिनियतप्राप्तिकत्वा न्यतरसम्बन्धेन परमप्राप्यत्वविशिष्टे परमपदशब्दशक्ति रिति पर्यवस्यति । वेदार्थसंग्रहतात्पर्यदीपिकायाम् " एकावयवशक्त्या त्रिष्वपि मुख्यः परमपदशब्दः " इति वदतां व्यासाचार्याणा मप्यत्रैव तात्पर्यम् । यथा हि देवादिशब्दानां साक्षा त्तत्प्रवृत्तिनिमित्त देवत्वाद्याश्रये शरीर इव परम्परया तदाश्रये आ- त्मन्यपि मुख्यत्व मंगीक्रियते भूरिप्रयोगाविशेषा त्सिद्धा, तथात्रापि भूरिप्रयोगाविशेषात परमपदशब्दस्यापि साक्षात्परम्पराभेदकृतप्रवृत्ति निमित्तसम्बन्धभेदेपि त्रिष्वपि मुख्यत्व मास्थेय मिति व्यासार्याणां निगूढाशयः ॥ स्वप्राप्त्युत्तरकालादिवाचक पदसन्दर्भविरहात भग वत्प्राप्तिगर्भत्व प्रवृत्तिनिमित्तघटकताप्रत्यायक पदसन्दर्भविरोधाच्च भवदुपदर्शितं प्राप्यविशिष्टान्यप्राप्यत्वं न कथंचिदपि वेदार्थसंग्र- हाक्षरगोचर इत्यवधेयम् ।

एतेन – उक्तसम्बन्धेन प्राप्यविशिष्ट प्राप्यत्वरूप मर्वाचीनप्राप्य त्वमेवच प्रतीकपदप्रवृत्तिनिमित्तमिह विवक्षितम् । इत्थंच अचिद्वस्तु तन्मिश्रयोरेव प्रतीकताविश्राम्यति तत्रैवाविद्यया ब्रह्मप्राप्तिप्रतिरोधात्। अतएव पूर्वोदाहृत भाष्यदीपसारग्रन्थेषु अचिद्वस्तुतन्मिश्रोपासक वि- षयितयैव प्रतीकालम्बनशब्दो व्याख्यातः – इत्यप्यसमंजसं वेदितव्यं भूमविद्याप्रकरणस्थ प्राणशब्दनिर्दिष्ट प्रत्यगात्मस्वरूपोपासकानां प्रती कोपासकत्वानुपपत्तेश्च । प्रागस्म दुपदर्शित भूमाधिकरण भाष्यादौ प्राणोपासकस्य प्रत्यगात्म याथात्म्यवेदित्वस्य विशदतया अचिद्वस्तु

तन्मिश्रमात्रे प्रतीकत्वाविश्रमासम्भवात् । अतएव " उभयेपिहि " इत्यादिना विशिष्टोपासनेनैव परिपूर्णोपासकत्व मप्रतीकालम्बनत्वपर्य वसितं पंचाग्निविदां सारेभिहितं । न केवल विशुद्धप्रत्यगात्मो पासन मात्रेण ।

यद्यपि – परम्प्राप्यस्मात्तत्परमं, परमं च तत्प्राप्यंच परमप्राप्यमि तिविग्रहे परमशब्दघटक परशब्दस्य उत्तरकालप्राप्तव्योत्कृष्ट समभि व्याहृतपदार्थतावच्छेदकावच्छिन्नपरतया यस्मात्प्राप्तादुत्तरकालप्राप्तव्यो त्कृष्टप्राप्यवस्तु नास्ति तादृशंप्राप्यमित्यर्थासिद्ध्या परमप्राप्यशब्देन य– थोक्तरूपावच्छिन्नोर्थः पर्यवसानतो लभ्यते – इति तदपि नसत् । तथासति वेदार्थसंग्रहे "भगवत्स्वरूपादीनि त्रीण्यपि परमप्राप्यत्वादेव परमपदव्यपदेश्यानि " इत्यनुक्त्वा " भगवत्स्वरूपं परमप्राप्यत्वादेव परमपदशब्दवाच्यं इतरयोरपि भगवत्प्राप्तिगर्भत्वादेव परमपदत्वं " इतिविशेषप्रदर्शनासंगतेः । परशब्दस्य स्वसमभिव्याहृत पदार्थताव- च्छेदकप्रयुक्तोत्कर्षवत्परतायाः स्तत्रतत्रदर्शनेपि उत्तरकालप्राप्तव्योत्कृष्ट परतायाः प्रयोगेक्काप्यदर्शनाच्च । तस्मात परमपदशब्दे परमशब्दः असंकोचात सर्वोत्कृष्टमाह । पदशब्दश्चप्राप्यं । तादृशश्च परमप्राप्य त्वं एकत्रसाक्षात्सम्बन्धेन इतरयो स्तूक्तपरम्परासम्बन्धेन विवक्षित मित्येव भाष्यकृतामाशयः इत्यवधेयम् । किञ्चात्र भवदुदित परमप्राप्यत्वोत्कर्षे स्वोत्कृष्टत्वसम्बन्धनिवेशनमपि विफलम् । परम प्राप्यत्वाभिमतस्य भगवत्स्वरूपादि त्रितयान्यतमस्य प्राप्तिदशायाम्रे वोभयविभूतिविशिष्टब्रह्मणः प्राप्तेः कस्यचिदपि प्राप्यस्यानवशेषात् ।

एतेन उत्कृष्टत्वश्चात्रानन्दहेतुत्वनिबन्धनं ग्राह्यं । तेनान्यादृशो त्कर्षस्यान्यत्रसत्वेपि नक्षतिः– इत्यप्यसदितिवेदितव्यम् । उत्कृष्ट त्वनिवेशनएव प्रयोजनाभावे तत्परिष्करणप्रयासस्य सुतरां निष्प्रयो जनत्वात् । अपिच एकस्यपरिशुद्धस्वात्मप्राप्तिगर्भ मुक्त्यनन्तरम

न्यस्यब्रह्मप्राप्तिसम्भवेन तादृशपरिशुद्धात्मन स्स्वपदेनपरिग्रहे स्व-प्राप्त्युत्तरकालीना न्यदीयप्राप्तिकर्मत्वस्वोत्कृष्टत्वयोः परब्रह्मणिसम्भवेन तदुभयसम्बन्धावच्छिन्नाधेयतासम्बन्धेन परब्रह्मरूपप्राप्यविशिष्टत्वस्यैव तादृशपरिशुद्धात्मनि सत्त्वा त्तदन्यत्वासम्भवेन तादृशपरिशुद्धात्मनः परमप्राप्यत्वानुपपत्तिः । यदिचैतद्दोषपरिजिहीर्षया सम्बन्धघटकीभू तप्राप्त्योस्समानकर्तृकत्वविवक्षया उत्तरकालीनत्व समानकर्तृकत्वो भयसम्बन्धेन स्वप्राप्तिविशिष्टप्राप्तिकर्मत्वस्यैव प्रथमसम्बन्धरूपताश्री-यते तदा यादृशनामाद्युपासकेन स्वोपास्यप्राप्तिसमनन्तरं नततो तिशयितं किञ्चिदपि कदाचिदपि प्राप्तं।तादृशनामादेः परमप्राप्य-त्वापत्तिः प्रतीकत्वानुपपत्तिश्च । तादृशनामादिप्राप्त्युत्तरकालीनतादृ शनामादिप्राप्तिसमानकर्तृक तादृशनामाद्यवधिकोत्कर्षवद्वस्तु प्राप्तेरप्र सिद्ध्या प्राप्यविशिष्टत्वासम्भवात् ।

यदपि – यद्वा – परान्मह त्परममिति विग्रहे अपरत्वेनाभिमता त्कस्मा च्चित्प्राप्यात्परत्वेनाभिमतं यत्प्राप्यं तस्मादुत्कृष्टप्राप्यं परमप्राप्य शब्देन लभ्यते । इत्थंचा चित्तस्वरूप प्राप्यात्परं यदचिन्मिश्र चित्तत्व रूपं प्राप्यं तस्मा दुत्कृष्टत्व लक्षणं परमप्राप्यत्वं स्वोत्कृष्ट प्राप्यो-त्कृष्टत्व सम्बन्धेन प्राप्यविशिष्टत्व पर्यवसितं प्रकृतिवियुक्त प्रत्यगात्म स्वरूप परमात्मलक्षण प्राप्यद्वय साधारणं – इति तदप्ययुक्तं, भूम विद्यायां "अस्तिभगवोनाम्नो भूयः । अस्ति भगवोवाचो भूय" इत्यादि प्रश्नानां "वाग्वावनाम्नो भूयसी । मनोवाववाचोभूय" इत्यादि प्रतिवचनानांच दर्शनेन तत्र निर्दिष्टानां नामादीना म्मध्ये उत्तरोत्तर निर्दिष्टानां पूर्वपूर्व निर्दिष्टा दुत्कृष्टतया प्राप्यत्वेन भवदङ्गी कृततया च स्वोत्कृष्ट प्राप्योत्कृष्टत्व सम्बन्धेन प्राप्यविशिष्टत्वस्य नामादि रूपं पूर्वपूर्वनिर्दिष्ट मादाय तदपेक्षयोत्कृष्टा त्तत्तदनन्तर निर्दिष्टा द्वागादिरूपा त्प्राप्या दुत्कृष्टेषु मन आदिषु सम्भवेन प्रकृति

वियुक्त प्रत्यगात्मस्वरूपा दर्वाचीनानामपि मन आदीनां परम प्राप्यत्वा पत्त्या प्रतीकत्वानुपपत्तेः । परान्महदिति व्युत्पत्तौ पञ्चमी समास प्रापक शास्त्राभावेन महत्पदे ह दित्यंश लोपविधायक शास्त्राभावेनच परमामिति रूपासिद्धेश्च ॥ यत्तु - पृषोदरादिवत्तत्तदवयवलोपमाश्रित्य व्युत्पादनीयस्य परमशब्दस्य पूर्वोक्त व्युत्पत्ति वदेषापि व्युत्पत्ति स्सम्भवति - इति - तदसत् , परमशब्दस्य पृषोदरादित्वकल्पने प्रमाणा भावात् । नच परमशब्दस्या न्यथानिष्पत्ति विरह एव तत्कल्पक इति वाच्यं, प्रथमं भवदुपदर्शित व्युत्पत्त्यैव तन्निष्पत्तेः । नखल्व न्यथासिद्धस्यापि शब्दस्य स्वस्वा भिधित्सितार्थलाभायैव पृषोदरादित्व कल्पनं मर्षयन्ति वैयाकरणाः । नच परम्मा यस्मादिति प्रथम मुप दर्शित व्युत्पत्तिरपि पृषोदरादित्वयैव निर्वहणीया , अन्यथा अव्ययमा शब्दे ह्रस्वासम्भवादिति विनिगमनाविरहेणै वेयमपिव्युत्पत्तिस्सिद्धय तीति वाच्यं, "ह्रस्वो नपुंसके प्रातिपदिकस्ये " त्यनेनैव तत्रह्रस्वसिद्धेः । नच पुल्लिङ्गे परमशब्दे पृषोदरादित्वकल्पन मावश्यकमिति वाच्यं, पृधातु निष्पन्न परशब्दस्यैव परम्मास्मीतिङ्प्रत्यय मूलक सुधादि प्रदर्शित व्युत्पत्ति निष्पन्नस्य तस्य उत्कृष्ट रूढतयैवोपपत्तेः । अस्तुवा प्रामाणिकैः प्राचीनैः परोमायस्मादिति व्युत्पत्त्या पृषोदरादित्व कथन पूर्वकं परमशब्द निष्पत्ति प्रदर्शना त्तत्प्रामाणिकता भवदुपदर्शितायाः परान्महदिति व्युत्पत्ते स्त्वप्रामाणिकतैवेति ध्येयम् ।

एतेन - एषापि व्युत्पत्ति र्भाष्यकारा भिमतैव । अत एव - गीताष्टमाध्याय विंशैक विंशश्लोक भाष्ये भाषितम् । तन्ममपरमन्धाम परं नियमनस्थानं अचेतन प्रकृति रेकं नियमनस्थानं । तत्संसृष्ट रूपा जीवप्रकृति र्द्वितीयं नियमनस्थानं । अचित्संसर्गवियुक्तं स्व रूपेणावस्थितम् मुक्तस्वरूपं परमं नियमनस्थान मित्यर्थ इति । अत्र प्रकृति विनिर्मुक्त प्रत्यगात्म विषयस्य परमन्धामेत्यस्य नियम-नस्थान पर्वत्रये तृतीय पर्वस्थानरूपतां प्रकृतिवियुक्त प्रत्यगात्मन

उपपाद्य तत्परत्वोपपादनात् परमशब्दस्य परान्महदिति व्युत्पत्ति रेवाभिमता । अन्यथा नियमनस्थान पर्वत्रय प्रदर्शना नावश्यकत्वात — इत्यपि निरस्तं । परमशब्दस्य सुप्रसिद्धयोत्कृष्ट रूढ्यैव तत्त द्राघ्योपपत्तेः कस्यापि भाष्यवाक्यस्येदृश कल्पनाभिप्रायकत्वा भावात । तथाहि परमशब्दस्ताव दुत्कृष्टवाची त्यविवादं । तत्रच सतिसम्भवे सर्वावधिकोत्कर्ष एवा संकोचन्याया त्प्रतिपाद्यते । अत एव "शान्तानन्त महाविभूति परमं ब्रह्म" इत्यत्राचार्यैः "परमं सर्वो त्कृष्टं" इति विवृतं । असतितु तत्सम्भवे स्वसमभिव्याहृत पदार्थ तावच्छेदक रूप प्रयुक्तोत्कर्ष विवक्षायां स्वसमभिव्याहृतपदार्थता वच्छेदक रूप समानाधिकरणा वधित्वाकापकर्षा समानाधिकरणस्व समभि व्याहृत पदार्थतावच्छेदक रूप प्रयुक्तोत्कर्षवत्त्वं समभिव्याहार महिम्ना तत्तत्पदात्प्रत्याय्यते, परमोधर्मः परमा भक्तिरित्यादौ "एषास्य परमागति रेषास्यपरमासम्प देषास्यपरमोलोक एषोऽस्यपरम आनन्दः" इत्यादौच रूपान्तर प्रयुक्तोत्कर्ष विवक्षायान्तु यथा कथंचिदापेक्षिकोत्कर्ष एव तत्पदा त्प्रत्याय्यते । अत एव "ब्रह्माशिवश्शतमखः परमस्स्वराट्" इत्यत्र अकर्मवश्यतया स्वराट्पदार्थे मुक्ते परमत्वं ज्ञानसंकोच रूप क्षरण विरहप्रयुक्त मक्षरशब्द निर्दिष्टं ब्रह्माद्यवधिक मित्यनु गृहीत माचार्यैरिति स्थितिः । तदत्र गीताभाष्ये स्वसमभि व्याहृतपदार्थतावच्छेदक भूत नियमनस्थानत्व प्रयुक्तोत्कर्षस्य गीतास्थेन परमपदेन प्रतीति र्भाष्यकृता प्रतिपिपादयिषिता । ततश्च नियमन स्थानत्वं प्रयुक्ते उत्कर्षे नियमनस्थानत्व समानाधिकरणावधिता कापकर्षा समानाधिकरणत्वं धामशब्द समभि व्याहृतेन परम शब्देन बोधनीयम् । तत्रचा समानाधिकरणान्तस्य तदैव व्यावृत्ति स्स्फुटं प्रत्येतुं शक्यते यदि नियमनस्थानावधिका वुत्कर्षापकर्षौ क्वचिदेकत्र सम्भवतः इत्या शयेनैव नियमनस्थानपर्व त्रयं सम्भवाभिप्रायेण प्रादर्शि भगवता भाष्यकृता । तत्रच मध्यमपर्वान्तर्भावेण प्रथमपर्वावधिकस्य नियमनस्थानत्व प्रयुक्तोत्कर्षस्य

चरमपर्वावधिकापकर्ष समानाधिकरणता स्फुटप्रतीतेः असमानाधि करणान्तेन तादृशोत्कर्ष व्यावृत्तिस्सुघटा सुग्रहाच चरमपवर्गते उत्कर्षे इति उत्कृष्टरूढ़ परमपदाभिप्रायकतयैव तद्भाष्योपपत्तेः किमिति सुधैवातिगम्भीर भावानां भाष्यकृतां "रामो लक्ष्मण मब्रवीत्" इत्यत्र रामलक्ष्मण सीताहनुम तदङ्गलांगूला द्यर्थवर्णन परपौराणिक परिकल्पित व्युत्पत्ति समशीलातिक्लिष्ट तत्पदव्युत्पत्त्य-भिप्रायकत्वं वर्ण्यते । अन्यथा "उपद्रष्टानुमन्ताच कर्ता भोक्ता महेश्वरः । परमात्मेति चा प्युक्तो देहेस्मिन्पुरुषःपरः ॥" इति गीता त्रयोदशाध्याय द्वाविंशश्लोक भाष्ये "देहात्ममनांसि प्रति-महेश्वरः" इत्यत्र जीवस्य संकुचितैश्वर्य वतः महत्त्वोपपादनाय तदपेक्षया र्वाचीनानां यथा कथंचि त्सम्भावितैश्वर्याणां देहेन्द्रिय मनसां त्रयाणां प्रदर्शनात तदनुरोधेन मूर्तेरधिकात महतोऽधिक मिति व्युत्पत्तौपृषोदरादित्वकल्पनाया मूर्त्यादिशब्देषु चतुर्षु एकैक वर्णशेषेण महेतिशब्दनिष्पत्ति स्वीकारेपिभाष्यकृता मभिप्रायकल्पनापत्तेः। एवं तत्रैव भाष्ये - परमात्मशब्दविवरणावसरे "अस्मि न्देहे देहे-न्द्रियमनांसिप्रति परमात्मेति चाप्युक्तः । देहे मनसि चात्मशब्दो नन्तरमेव प्रयुज्यते "ध्याने नात्मनि पश्यन्ति केचि दात्मान मात्मनेति" इत्यनेन तत्तद्भाष्यादिप्रसिद्धात्मव्यपदेशानां देहेन्द्रिय मनसां त्रयाणां जीवादर्वाचीनानां प्रदर्शनात् तदध्याय एव "समं सर्वेषु भूतेषु तिष्ठन्तं परमेश्वरं" इति सप्तविंशश्लोकभाष्ये "देहे-न्द्रियमनांसिप्रति परमेश्वरत्वेनास्थित मात्मानं" इत्यत्राप्यर्वाचीन पदत्रय प्रदर्शनाच्च परमशब्देन परा द्वरा न्महादित्यस्या अपि व्यु त्पत्तेः पृषोदरादित्वकल्पनया स्वीकारे भाष्यकारतात्पर्यकल्पनापत्तिः। नच तत्र "देहे मनसि चात्मशब्दोनन्तरमेव प्रयुज्यते" इति तत्र भाषणा दर्वाचीनपर्वद्वयमेव तत्र विवक्षित मिति वाच्यं, तथासति "देहेन्द्रिययोः" इत्यत्र इन्द्रियपदोपादानवैफल्यप्रसंगात् । तस्मात्

" स्थूलोहं कृशोहं काणोहं बधिरोहं " इत्यादि लौकिकव्यवहाराद्यनुसारि तत्तद्धादिकल्पितात्मव्यपदेशानां प्रबन्धान्तरप्रसिद्धात्मपद्व्यवहार्यताकानां देहादीनां मध्ये देहमनसो रात्मशब्दप्रयोग इहैव प्रसिद्धः इति प्रबन्धान्तरे प्रदेशान्तरे वा न तत्प्रयोगो मृग्य इत्येतन्मात्रतात्पर्यकं तद्भाष्य मित्येवाश्रयणीयम् । स्पष्टं चेदं तद्भाष्यतात्पर्यचन्द्रिकायाम् ।

एतेन - एवं त्रयोदशाध्यायद्वाविंशश्लोकस्थ परमात्मशब्दव्याख्यानपरभाष्यग्रन्थेन पंचदशाध्याय सप्तदशश्लोकस्थ परमात्मशब्द भाष्यग्रन्थेन च परमशब्द स्येदृशव्युत्पत्ति रभिमता वगम्यते । तत्राप्यर्वाचीन पर्वद्वयप्रदर्शनात् - इत्यप्यपास्तम् । त्रयोदशाध्याय भाष्ये अर्वाचीनपर्वत्रयस्यैव प्रदर्शितताया व्यक्ती कृतत्वात् । परम शब्दोत्कृष्टरूढ्यैव सर्वभाष्योपपत्ते रप्युपदर्शितत्वाच्च ।

एतेनैव - एवं परमेव परममिति स्वार्थिकप्रत्ययान्तत्व माश्रित्य परमशब्दस्योत्कृष्टमात्रविषयताया अपि सुवचत्वा दपुनरावृत्ति निबन्धनोत्कर्षशालिप्राप्यत्वेन दर्शितोभयविषयः परमप्राप्यशब्दो भवितु मर्हति इत्यप्यसंगतं वेदितव्यम् । तादृशस्वार्थिक प्रत्यया नुशासनाभावात् । पृषोदरादित्वकल्पक प्रमाणाभावाच्च । परंमातीतिव्युत्पत्तौ डप्रत्ययेनैव अमरसुधादौ परमशब्दस्योत्कृष्टपरस्य साधितत्वाच्च ।

यत्तु - परमशब्दस्य दर्शितरीत्या केवलोत्कृष्टविषयतापि दर्शितगीताभाष्ये दर्शितधामशब्दस्य प्रकाशपरत्वकल्पे ऽभिप्रेता । यथोक्तं तत्र - अथवा प्रकाशवाची धामशब्दः प्रकाशश्चेह ज्ञान मभिप्रेतम् । प्रकृतिसंसृष्टा त्परिच्छिन्नज्ञानरूपा दात्मनो ऽपरिच्छिन्नज्ञानरूपतया मुक्तस्वरूपं परमं धामेति । अत्र परापरप्रकाश पर्वद्वयस्यैवा भिधाना त्परमशब्दस्योत्कृष्टमात्र विषयतैवा भिप्रेता ।

पूर्वकल्पाभिप्रेतव्युत्पत्ते रिहाप्यभिप्रेतत्वे अपरः प्रकाशः परप्रकाशः परात्परप्रकाश श्चेति प्रकाशपर्वत्रयं ह्यभिधातव्यम् । असम्भावित मेव च परात्परप्रकाशस्वरूपत्वं प्रत्यगात्मनि । प्रकृतितत्त्वस्य प्रकाशरूपत्वाभावेना परप्रकाशपर्वरूपत्वासम्भवात् – इति तदप्यसत् । परिच्छिन्नापरिच्छिन्नप्रकाशरूपपर्वद्वयस्य तद्भाष्ये प्रदर्शनेपि परिच्छिन्न प्रकाशेष्वपि “ अविद्या कर्मसंज्ञान्या तृतीया शक्ति रिष्यते । यया क्षेत्रज्ञ शक्ति स्सा वेष्टिता नृपसर्वगा । संसारतापानखिलानवाप्नोत्यतिसन्ततान् । तयातिरोहितत्वाच्चशक्तिः क्षेत्रज्ञसंज्ञिता । सर्वभूतेषु भूपाल तारतम्येन वर्तते । अप्राणवत्सु स्वल्पासास्थावरेषु ततोधिका । सरीसृपेषु तेभ्योपि ह्यतिशक्त्या पतत्रिषु । पतत्रिभ्यो मृगास्तेभ्य स्तच्छक्त्या पशवो-धिकाः । पशुभ्यो मनुजाश्चाति शक्त्यापुंसः प्रभाविताः । तेभ्योपि नागगन्धर्व यक्षाद्या देवतानृप । शक्र स्समस्तदेवेभ्य स्ततश्चापि प्रजापतिः । हिरण्यगर्भोपिततः पुंस श्शक्त्युपलक्षितः ॥ ” इतिवैष्णव पुराणादि प्रसिद्धप्रमाणानुरोधेन प्रकाशतरतम भावस्य प्रसिद्धतया शक्रादि प्रकाशेभ्यःपरा द्धिरण्यगर्भप्रकाशा न्महत्त्वस्य मुक्तप्रकाशे सम्भवेन पर्वत्रयस्वतः प्रतीतिमादाय परमत्वोपपादन सम्भवाभिप्रायक ताया भाष्यकृत स्सम्भवेन भवदुपदर्शित परमशब्द द्वितीय निर्वचने नैवात्रा प्युपपत्तिसम्भवात । स्फुटतया परमत्वावधारणार्थं क्वचि त्पर्वत्रय प्रदर्शनेपि पर्वद्वयाभिधान स्थलेपि स्व समभिव्याहृत पदार्थतावच्छेदक समानाधिकरणावधिता कापकर्षा समानाधिकरण स्व समभिव्याहृत पदार्थतावच्छेदक प्रयुक्तोत्कर्ष रूपास्मदुपदर्शित परमशब्दार्थस्य सम्भवेन तस्यैव सर्वेष्वेवोदाहृत भाष्येषु परिग्रह सम्भवे प्रातिभाष्यवाक्यं तत्पदार्थ भेदकल्पनाभिप्रायकल्पन स्यात्यन्ता युक्तत्वाच्च ॥ तस्मात्परमशब्द निर्वचनप्रकारोयं प्रमाण पथदूरो निष्फलो मन्दव्यामोहैकानुकूलश्चे त्यवधेयं सूरिभिः ॥

यदपि – परम्प्रायस्मादिति व्युत्पत्तौ परशब्दस्योत्कृष्टमात्र परतायामपि परमप्राप्यत्वस्य स्वोत्कृष्टत्व सम्बन्धावच्छिन्नाधेयता सम्बन्धेनप्राप्य विशिष्टान्यप्राप्यत्व पर्यवसानेपि तादृशपरमप्राप्त्या दर्वाचीनत्वस्य विशुद्ध प्रत्यगात्म साधारणस्य प्रतीकपद प्रवृत्ति निमित्तत्वेपि न पश्चाग्निविदां तादृश प्रत्यगात्मोपासकतया प्रतीकालम्बनत्व प्रसङ्गः प्रतीकालम्बनपदेन हि स्वप्राप्ति प्रयोजक स्वनिष्ठ विलक्षण विषयता निरूपकत्व सम्बन्धेन प्रतीक विशिष्टोपासनाश्रयत्व विवक्षायां "सर्वं ह पश्यः पश्यति" इत्यादि श्रुत्या सर्वेषामेव ब्रह्मविदां सर्वप्राप्तृतया तत्क्रतुन्यायेन सर्वोपासकताया आवश्यकतया प्रतीकालम्बनत्वापत्तेः। ब्रह्मप्राप्तचभाव विशिष्ट स्वप्राप्ति प्रयोजक स्वनिष्ठ विलक्षण विषयतानिरूपकत्व सम्बन्धेन प्रतीक विशिष्टोपासनाश्रयत्व मेवेह विवक्षितं, तदेक प्राप्तिप्रयोजक तन्निष्ठविलक्षण विषयता शाल्युपास नाश्रयत्वस्यैव तदालम्बनत्व रूपत्वात। स्वप्राप्तौ ब्रह्मप्राप्तच भाव वैशिष्टयंच स्वसमान कालीनत्व सामानाधिकरण्योभय सम्बन्धेन। ब्रह्मविदां मुक्तिदशायां ब्रह्मप्राप्तौ विद्यमानायामेव तदन्तः पाति तया प्रतीकपदार्थ प्राप्तेर्विद्यमानतया न प्रतीकालम्बनत्वं तेषां– इति। तदप्यसारं, कामचाराद्यर्थं नामादि प्रतीकोपासकानां नामाद्यालम्बनत्वा नुपपत्तेः। नामादि निष्ठोपासन विषयतायाः कामचारादि प्राप्तिप्रयोजकतया नामादि प्राप्तिप्रयोजकत्वाभावस्य प्रागेवोक्तत्वात् । एवं सम्बन्ध घठकभूतस्वप्राप्तौ ब्रह्मप्राप्तचभाव वैशिष्टच निवेशे प्रतीकपदस्य वस्तु मात्रपरतायामपि बाधक विरहात् परमप्राप्याधिका र्वाचीनत्वावच्छिन्न वाचकता कल्पन प्रयासस्य भवतां विफलत्वापत्तिः ।

किञ्च – उपदर्शितसम्बन्धेन प्रतीकविशिष्टोपासनावत्त्व रूप प्रतीकालम्बनत्वाभावः ब्रह्मोपासकेषु तत्तत्प्रतीकप्राप्तिमत्सु ब्रह्मप्राप्तच

भावरूप विशेषणाभावा देवोपपादनीयः ब्रह्मप्राप्त्यभावाभावरूप ब्रह्म प्राप्तिपर्यवसितः । यथाहि विशेष्यवति विशिष्टाभावो विशेषणाभाव पर्यवसितः तथा विशिष्टघटितसम्बन्धेन किंचिद्विशिष्टवस्तु विशेषा भावोपि विशेष्यघटितसम्बन्धेन किंचिद्विशिष्टवस्तुमति वर्तमानः सम्बन्धघटकीभूत विशेषणाभावपर्यवसित एव, तुल्यन्यायात । इत्थं च ब्रह्मप्राप्तिमत्त्वं यावन्ननिर्धार्यते उपासकेषु ताव त्तत्र अप्रतीकाल-म्बनत्व मपि न निर्धारयितुं शक्य मिति कार्याधिकरणप्रवृत्तिहेतु भूताया अर्चिरादि रातिवाहिकगणः कान् ब्रह्म प्रापयति कान्वा ब्रह्म न प्रापयतीति शंकाया अनिवर्तकमेव सिद्धान्तसूत्र मिदं स्यात । आतिवाहिकगणः ब्रह्मप्राप्तिमत्पुरुषान् ब्रह्म प्रापयतीत्यर्थ एव भवतां तत्सूत्रार्थपर्यवसानात् । तथा चैतावता महता प्याड म्बरेण कार्याधिकरणं विषयविशयादिपंचांगकं साधु समर्थितं तत्र भवद्भिः । " संशयस्य उपासितृभेदमूलत्वा त्स एना नित्युपासितॄ-णां प्रतिपन्नत्वाच्च उपासीना नित्यध्याहृतं " इत्येदधिकरणटीका ग्रन्थविरोधश्च प्रथम मस्माभि रुपदर्शितो त्राप्यनुवर्तत एव । " सं-शयस्य ब्रह्मप्राप्तितदभावमूलत्वात् " इत्यादिरीत्यैव तत्र वक्तव्यता प्रसंगादिति ॥ तस्मा दस्मदुपदर्शितरीत्या प्रतीकपदस्यैकदेशपरता माश्रित्य प्रतीकालम्बनपदप्रत्येये प्रतीकमात्रोपासके मात्रपदेन प्रतीक विशेषणतया ब्रह्मात्मकत्वभान व्यावर्तनविवक्षणात ब्रह्मात्मकत्वानव च्छिन्न ब्रह्मात्मकत्व समानाधिकरणविषयताको पासनवद्भिन्नान् आति वाहिकगणो ब्रह्म प्रापयतीति तत्सूत्रार्थवर्णनमेव वर मिति ध्येयम् ॥

अत एव - " येतु ब्रह्मकार्यान्तर्भूतनामादिकं वस्तु देवदत्ता दिषु सिंहादिदृष्टिवत् ब्रह्मदृष्ट्या केवलं वा तत्तद्वस्तूपासते नता न्नयति " इति प्रतीकालम्बनपदविवरणभाष्यं संगच्छते । अत्रहि ब्रह्मकार्यान्तर्भूतशब्देन एकदेशत्वाकारेण प्रतीकशब्दार्थत्वं नामादि-ष्वभिसंहितम् । अन्यथा अन्तर्भूतत्वोपादानवैफल्यात । ब्रह्मकार्य

पदेन च ब्रह्मात्मकत्वावश्यंभावो ऽभिसंहितः । नामादिक मित्युत्कीर्तनन्तु भूमविद्याप्रकरणे ब्रह्मदृष्ट्योपास्यत्व प्रसिद्धिस्फुटीकरणाभिप्रायमात्रेण न पुन र्नामत्वादिकमपि प्रतीकपदार्थतावच्छेदक घटक मित्यभिप्रायेण, प्रयोजनाभावात । ब्रह्मदृष्ट्येत्यनेन अभेदसम्बन्धावच्छिन्न ब्रह्मनिष्ठप्रकारताक दृष्ट्यभिन्नत्वस्य केवलं वेत्यनेन तदभावस्य चोपासने कथनात, नामादिविशेषणतयो पात्तस्यापि ब्रह्मकार्यत्वस्य तदुपक्षित ब्रह्मात्मकत्वस्य च प्रकारत्वा कथना द्व कल्पद्वयेपि नामाद्यंशे ब्रह्मनिष्ठ स्वात्मकत्वसम्बन्धावच्छिन्नप्रकारताकत्वाभाव उपासने लभ्यते । केवल मित्यस्य वा पूर्वोपदर्शित सारवाक्यघटक स्वतः पदस्थानापन्नतया तादृश सारवाक्यानुवादपर तत्वमुक्ताकलाप पद्यगतस्य “ यस्तूपास्ते यथोक्तं वदितर दखिलंब्रह्म दृष्ट्या स्वतोवा ” इत्यत्रत्य स्वतः पदस्य “ ब्रह्मदृष्टिं ब्रह्मपर्यन्ततांच विहाय ” इति सर्वार्थसिद्धौ विवरणदर्शनात् अभेदसम्बन्धावच्छिन्न ब्रह्मप्रकारताकत्व स्वात्मकत्व सम्बन्धावच्छिन्न ब्रह्मप्रकारताकत्वान्यतरा भावार्थकता बोध्या । ब्रह्मदृष्ट्ये त्यत्रतु विरोधादेव ब्रह्मात्मकत्व दृष्ट्यभावोलभ्यते । ततश्च सर्वथा ब्रह्मात्मकत्वानवच्छिन्न नामादिनिष्ठ विषयता कोपासनावतां य उपासते इत्यन्तेनलाभः । अत एव तदधिकरण निगमनभाष्ये – “ तस्मादचिन्मिश्रं केवलंवा चिद्वस्तु ब्रह्मदृष्ट्या तद्वियोगेन च य उपासते नतान्नयति ” इति प्रतीकालम्बन पदार्थं पर्युदस्यं निर्दिश्य तत्प्रतिनिर्देशपरे “ अपितु परं ब्रह्मोपासीना नात्मानंच प्रकृतिवियुक्तं ब्रह्मात्मक मुपासीनाना तिवाहिकोगणो नयतीति सिद्धं ” इति सन्दर्भे ब्रह्मात्मकत्वं स्वात्मन्युपासन प्रकारतयोपात्तमित्यवधेयम् । तत्रापिच ‘ केवलंवा चिद्वस्तु ’ इत्येत न्निगमनभाष्य सन्दर्भगतवाक्ये अकारप्रश्लेषा प्रश्लेषाभ्यां चिदचितो र्द्वयोरपि ग्रहणमभिधाय केवलचिन्मात्रोपासकस्यापि प्रतीकोपासकत्वं परमात्मशरीरकत्वविशिष्ट स्वात्मोपासकस्या प्रतीकोपासकत्वं च सुस्पष्टं व्यवस्थापित माधिकरणचिन्तामणा वाचार्यचरणैः । तत्रैक पदस्योभयार्थं ग्रहणेच प्रागस्मदुपदर्शित सार ग्रन्था नुसारादिरेव गमकतयाभिसंहित इत्यवधेयं । भवतांतु

सूत्रभाष्ये - " निर्धूतनिखिलविकारं निखिलहेय प्रत्यनीक कल्याणै-कतानं निरतिशयानन्दं परं ब्रह्मसविभूतिकं सकलकल्याणगुण मनु भवति मुक्तः तद्विभूत्यन्तर्गतत्वेन विकारवर्तिनां लोकानामपि मुक्त भोग्यत्वं " इति कृत्स्नस्यैव मुक्तभोग्यत्वभाषणात् , " ब्रह्मनिष्ठानां भोग्यविधयाप्राप्यमपि परमेवब्रह्म " इत्यवधारणस्य तद्विरुद्धत्वात् । तथा मुक्तमात्रस्यैव निरतिशयानन्द सविभूतिक सकल कल्याणगुण ब्रह्मभोगस्य तदन्तर्गततया विकारभोगस्यच तत्र भाषणात् पञ्चाग्नि विदोपि मुक्तत्वाविशेषेण तादृशब्रह्मभोगकण्ठोक्तेः, पंचाग्निविदान्तु प्रत्यगात्मतत्त्वमेव इत्यवधारणस्यापि तद्विरुद्धत्वात् ।

एतेन - प्रकृतिमण्डलोर्ध्वदेशावच्छिन्नस्य परस्य ब्रह्मणो भोग स्थानविधया प्राप्तिरेवचोभय विधाधिकारि साधारणी "सएनान्ब्रह्मगमय ती" त्यादि शास्त्रेष्वमानवायत्ता प्रतिपाद्यते । भोग्यविधया स्वाभिम तब्राप्यप्राप्तिस्तु स्वस्वोपासन स्वभावैक निर्धार्या नाना नवयत्नादिना-इत्युच्छृंखल कल्पनमपि परास्तम् । उदाहृतभाष्यएव साभिप्रायेण मुक्तपदेन निश्शेषाविद्यानिवृत्ति मच्चेतनमात्रस्य भोग्यविधयैव सवि-भूतिक निरतिशयानन्द ब्रह्मप्राप्ते भाषणात् मुक्तपदार्थतावच्छेदिका या निश्शेषा विद्यानिवृत्तेरेव तादृशब्रह्मप्राप्ति हेतुत्वाभिसन्धानाच्च । उपास नानाममानवयत्नादिक मद्वारीकृत्य भोग्यविधया ब्रह्मप्राप्तिप्राप्ति कारणताकथनस्या संगतत्वात । अतएव विकल्पाधिकरणे " सर्वा श्चविद्या ब्रह्मानुभवविरोध्यनादिकर्माविद्यानिरसनमुखेन ब्रह्मप्राप्ति फला इत्यविशिष्टफलत्वा त्सर्वासां विकल्पएव " इतिभाष्ये विद्यानां ब्रह्मप्राप्तौ स्वातन्त्र्यं निराकृत्य अविद्यानिवृत्तिद्वारकत्व मास्थाय द्वारैक्या त्फलैक्य मभिसन्धाय विकल्प व्यवस्थापनं कृतं संगच्छते । यदिच विशिष्टदेशं गतानां निश्शेषाविद्यानिवृत्तावपि विद्यावतां ब्रह्मानुभव वैषम्यं स्यात । तदा विद्यानां समुच्चयनिरास एव न स्यात । तदिद मुक्तं टीकायां तत्र व्याचार्यैः - " बन्धनिवृत्त्यनन्तरभावि

ब्रह्मानुभववैषम्यशंकानिरासेन विना समुच्चयनिरासायोगाच्च बन्ध निवृत्तिपूर्वक ब्रह्मानुभवरूपफलैकरूप्यं वक्तव्यं " इत्यादिना ॥ तस्मा द्भोगस्थानविधया प्राप्तित्वं भोग्यविधया प्राप्तित्वं च कार्यतावच्छेद-कीकृत्य विद्यानां प्रत्येकंकारणताभेदकल्पनं तत्राद्यधर्मावच्छिन्नं प्रति अमानवयत्नादिसाध्यनिश्शेषाविद्यानिवृत्तिद्वारा सद्वारककारणतायाः द्वितीयधर्मावच्छिन्नं प्रत्यद्वारककारणतायाश्च कल्पन मप्रामाणिकं उदाहृतभाष्यटीकादिविरुद्धं चेति विभावनीयम् । निश्शेषा विद्या निवृत्ति श्च द्वारतया भाष्योक्ता विशिष्टदेशगत्यैव साध्यत इति च " निश्शेषा विद्यानिवृत्तिरपि विशिष्टदेशगतिसापेक्षेतिगतिशास्त्रा दव गम्यते " इति कार्याधिकरणभाष्या देवावगम्यते । विशिष्टदेशगति रपि चामानवयत्नसाध्यैवेति भोग्यविधया ब्रह्मप्राप्ति रपि अमानव यत्नसाध्यैव पर्यवसितेति सा सर्वेषां मुक्ताना मविशिष्टैव स्वीकार्या । किंच - " दर्शयत श्चैवं प्रत्यक्षानुमाने " इति सूत्रभाष्ये " तथा मुक्तस्य सत्यसंकल्पत्वादिपूर्वकस्या प्यानन्दस्य परमपुरुष एव हेतु रिति श्रुतिस्मृती दर्शयतः । एष ह्येवानन्दयाति, मां च यो व्य-भिचारेण भक्तियोगेन सेवते । स गुणा न्समतीत्यैता न्ब्रह्म भूयाय कल्पते । ब्रह्मणोहि प्रतिष्ठाह ममृतस्या व्ययस्य च । शाश्वतस्य च धर्मस्य सुखस्यैकान्तिकस्य चेति " इत्यत्र मुक्तानां स्वस्वरूपा विर्भावपूर्वकानन्दे तदुपसम्पद्यमानपरज्योतीरूपपरब्रह्मैक हेतुकत्व भाषणेन उपासनास्वभावभेदेन मुक्तानां प्राप्तिभेदकथनं तद्भाष्य विरुद्ध मपि, " परं ज्योति रुपसम्पद्य स्वेन रूपेणा भिसम्पद्यते " इत्युपसम्पत्त्या विशेषे फलवैषम्यासम्भवात् ।

यदपि - भोग्यविधया प्राप्ति र्नाम स्वादुतमतया ऽनुभूयमान तत्तद्वस्तुसन्निकर्षविशेषलक्षण प्रधानतमप्राप्ति रेव । तादृशीच प्राप्ति रुपासनदशायां यस्यैव प्रधानप्राप्यतयोपासनं तस्यैव नान्यस्य तत्क्रतु न्यायात् - इति, तदयुक्तं पंचाग्निविद्यानिष्ठस्यापि स्वात्मानन्दमात्रा

प्रतीकालम्बनपदार्थतावच्छेदककोटौ ब्रह्मप्राप्त्यभावादिकं घटयतां पक्षे " येतु ब्रह्मप्राप्तिविनाकृतां कामचारादि प्राप्ति मुद्दिश्य उपासते न तान्नयति " इत्यादिरीत्यैव प्रतीकालम्बनपदार्थ विवरणपरभाष्या द्यवतारः प्रसज्येतेति दिक् ।

एतेन – प्रतीकालम्बनशब्दघटक प्रतीकशब्दस्य प्रकृतितन्मिश्र मात्रपरतया व्याख्यानपरोदाहृत भाष्यादिग्रन्थ स्तदेतत्पक्षद्वयेपि संगतः। द्वितीयपक्षे प्रकृतिवियुक्तप्रत्यगात्मनोपि प्रतीकपदार्थान्तर्भावेपि तत्प्रा- प्तिदशायां ब्रह्मप्राप्तिनैयत्येन ब्रह्मप्राप्त्यभावविशिष्ट तत्प्राप्तिप्रयोजक तदुपासना ऽप्रसिद्ध्या ऽत्रत्यप्रतीकशब्दस्य तत्परत्वासम्भवेन तथा व्याख्यानोपपत्तेः – इत्यादिक मप्यसमञ्जस मिति व्यक्तीकृतम् । प्रतीकालम्बनपदार्थविवरणपरभाष्यादौ क्वचिदपि प्राप्तिकथाया एवादर्शनेन प्रतीकप्राप्ते र्वा ब्रह्मप्राप्त्यभावस्य वा शब्दतोर्थतो वा तद्भाष्यादेर नवबोधेन प्रतीकप्राप्ति ब्रह्मप्राप्त्यभावयोः प्रतीकालम्बनपदार्थघटकता वचनस्य भाष्याद्यभिप्रायै दविष्ठतया बहुधा वेदितत्वात् ।

यत्तु – ' विशेषं च दर्शयती' ति सूत्रार्थवर्णनावसरे प्राणोपासक स्याचिन्मिश्रित फलप्राप्तिव्यवस्थापनं " यद्यपि " इत्यादिशंकासमा धानाभ्यां कृतं, तत्तु प्रागेवास्माभि र्निराकृतं, प्राणोह्येवैतानित्यादे र्वाक्यस्य फलपरत्वाभावादिति वेदितव्यम् ।

यदपि – नचैवं सति सर्वेषां ब्रह्मोपासकाना मात्मप्राप्ति ब्रह्म प्राप्त्यो रविशिष्टत्वे परब्रह्मोपासकानेव नयतीति वदता जैमिनिना किमपराद्धं, तत्पक्षा दस्मि न्पक्षे कोपिहि विशेषो नोपलभ्यते । पञ्चाग्निविदोपि हि यथोक्तरीत्या ब्रह्मोपासकेष्वन्तर्भूता भवन्तीति वाच्यं – इत्याशंकनं, तदयुक्तं, परब्रह्ममुख्यविशेष्यकोपासनावतामेवा र्चिरादिगते र्जैमिन्यभिमततया ब्रह्ममुख्यविशेष्यकोपासनवतां ब्रह्मा त्मकस्वात्ममुख्यविशेष्यकोपासनवतां चोभयेषा मर्चिरादिगते र्वाद

रायणाभिमततया पक्षद्वयविशेषस्या तिस्फुटत्वा द्भाष्यादौ । तथाच "उभयधा च दोषात् " इत्यंशविवरणपरं भाष्यं - " कार्य मुपासीना न्नयतीति पक्षे अस्मा च्छरीरा त्समुत्थाय परं ज्योति रुपसम्पद्येत्यादिका श्श्रुतयः प्रकुप्येयुः । पर मेवोपासीनानिति नियमे "तद्य इत्थं विदु ये चेमेरण्येश्रद्धातप इत्युपासते तेर्चिष मभिसम्भवन्ती"ति पंचाग्निविदोऽर्चिरादिगणो नयतीति श्रुतिः प्रकुप्येत् । अत उभयस्मिन्नपि पक्षे दोष स्स्यात् । तस्मा दुभयविधा न्नयतीति " - इति ॥ अत्र " पर मेवोपासीनानिति नियमे " इत्यत्र एवकारेण नियमपदेन च परब्रह्ममुख्यविशेष्यकत्वाभावव दुपासनवता मर्चिरादिगत्यभावो जैमिन्यभिमत इति स्पष्टं प्रतीयते इति ।

यदपि - पंचाग्निविद्यानिर्दिष्टाना मुभयेषां सामान्यतो ब्रह्मप्राप्तिफलब्रह्मोपासननिष्ठत्वतौल्येपि प्रत्यगात्मपरमात्मलक्षण प्राधान्याप्राधान्यव्यत्यासेन प्राप्यतारतम्यस्य दुरपह्नवत्वात् । ब्रह्मोपासकस्य हि ब्रह्मैव प्रधानप्राप्यं प्रत्यगात्मस्वरूपन्तु अप्रधानप्राप्यमेव । पंचाग्निविद स्तु प्रत्यगात्मस्वरूप मेव प्रधानप्राप्यं ब्रह्मत्वप्रधानप्राप्यमेव । अतः प्राप्यभेदो दुरपह्नवः - इति समाधानकल्पनं, तत्तु तथा प्राप्यभेदस्याश्रौततया अस्मार्ततया अपौराणिकतया अनैतिहासिकतया अभागवतशास्त्राधिगततया असाम्प्रदायिकतायाश्च प्रागेवावेदनेन निराकृतं वेदितव्यम् । अशक्योपपादता च तस्यावेदिताऽऽवेदयिष्यते च ।

यदपि - भोग्यभोगोपकरण भोगस्थानविधया नानाविधं प्राप्य मस्ति । तत्र भोग्यविधया प्राप्यत्वं प्रधानप्राप्यत्वं । तदितरविधया प्राप्यत्वञ्चा प्रधानप्राप्यत्वं, परस्य ब्रह्मणो भोगस्थानविधया प्राप्यत्वन्तूभयविधाधिकारि साधारणम् । तत्र ब्रह्मनिष्ठानां भोग्यविधया प्राप्यमपि परमेवब्रह्म । पञ्चाग्निविदान्तु प्रकृतिवियुक्त प्रत्यगात्म तत्त्वमेव इति- तदसत् ; जगद्व्यापारवर्जाधिकरणे विकारावर्तिचेति

निष्ठेनानिवृत्ताविद्येन स्वात्मन्येव उपासनवेळायां मनुसंहितमिति फलदशायां परब्रह्मणि नेनिरतिशयानुकूलत्वानुसन्धान सम्भवः । तथासति स्वात्मनि सातिशयानुकूलत्वानुसन्धानापत्त्या उपासनकालिक स्वात्मविशेष्यक निरतिशयानुकूलत्वानुसन्धान विरोधात । उपासिताकारप्रत्यगात्माकारप्राप्तेः कैरप्यनुपगमात । तथाच तस्यैव पंचाग्निविद्यानिष्ठस्य प्रधानतया प्रत्यगात्मप्राप्तिः निरतिशयानुकूलतारूपस्वादुतमतया प्रत्यगात्मानुभवरूपा । तस्या प्रधानतया ब्रह्मप्राप्तिश्च सातिशयानुकूलतारूप स्वादुतया ब्रह्मानुभवरूपा निर्विवादेति चेन्न । परब्रह्मा साधारण निरतिशयानुकूलत्वस्य स्वात्मन्यनुसंदधतो ऽयथाभुतो पासननिष्ठत्वापत्त्या अयथा भूत प्राप्तचवश्यम्भावेन संसारित्व प्रसंगे मुक्तिकथाया एवा सम्भवात् । भाषितंहि आत्मेति तूपगच्छन्तीति सूत्रभाष्ये "यथा वस्थितंच ब्रह्मोपास्यं । अयथोपासनेहि ब्रह्मप्राप्तिरेव्य यथाभूतास्यात । यथाक्रतु रस्मिन्लोके पुरुषो भवति तथेतः प्रेत्यभवतीति न्यायात् " इति । किंच – पंचाग्निविद्यायाब्रह्मोपासनत्वं "उभयेपि हि परिपूर्णं ब्रह्मोपासते'' इत्यादि सारसन्दर्भसिद्धम् । आनन्दत्वस्यै च सर्व ब्रह्मविद्यानुयायित्वं 'आनन्दादय' इति सूत्रसिद्धम् । तच्चानन्दत्वं निरतिशयभोग्यत्वलक्षण मिति दहराधिकरणटीकया "नह्यानन्दत्वस्य स्वरूप निरूपक धर्मतयासर्वविद्यानुयायित्वा दर्थसिद्धमिति निरतिशयभोग्यत्वं न पृथग्वाच्यं " इत्यनया सिद्धम् । तथाच पंचाग्निविदा उपासनवेळायामपि ब्रह्मणिनिरतिशयभोग्यत्वे प्रतिसन्धीयमाने कथं स्वात्मनि तत्प्रतिसन्धीयेत । तस्मात पंचाग्निविद्यानिष्ठेन उपासन दशायामपि स्वात्मनि सातिशयानुकूलत्वं परमात्मनि निरतिशयानुकूलत्वंचानु सन्धीयते न विपरीतम् । परन्तु किंचित्कालं केवलं स्वात्मानुभवसुखं परिमित मप्यनुभूय पश्चा द्विशिष्टपरब्रह्मसुखं निरतिशय मनुभवेय मितीच्छयैव मधुविद्यानिष्ठवत्पंचाग्निविद्यानिष्ठोपि कर्मविशेषवशा त्पंचाग्निविद्यायां प्रवर्तमानो विद्यामाहात्म्या दानुषांगिक

तादृश फलनिष्पत्त्यनन्तरं विशिष्टदेशं गतो ब्रह्मविद्यान्तरनिष्ठवदविशेषेण निखिलविभूतिगुणविशिष्टं परंब्रह्म भोग्यतयानुभवतीत्येव स्वीकार्यं गीताभाष्य शारीरकभाष्यैककण्ठ्यानुरोधादिना तात्पर्यचन्द्रिकादौ स्थापितमिति विभावनीयम् ।

एतेन – परस्य ब्रह्मणएकस्यैव स्वेच्छाप्रतिनियत देशभेदेषु नानाविध विलक्षणानन्द हेतु परिकर विशिष्टवेषेण तदविशिष्टवेषेणच नानाविधायाः प्राप्ते स्सम्भवेन पुरुषार्थ तारतम्यस्य सूपपादत्वं – इत्यपि परास्तं । मुक्तानां निश्शेषाविद्या निवृत्तिमतां प्राप्तिभेदएव मानाभावात् । आनन्दहेतुपरिकरस्यापि भूमाधिकरणरीत्या अविद्या विगमातिरिक्तस्या प्रामाणिकतया तस्य च यत्र क्वचिदपि देशविशेषेस्थितवतोप्य विशेषादानन्द वैलक्षण्यानुपपत्तेः ।

अत एव-उपासनप्रीतं परम्ब्रह्म ह्युपासका नातिवाहिक वर्त्मना प्रकृतिमण्डला त्परस्ता त्समन्ततः प्रदीप्त ज्योतीरूपं स्वात्मानं प्रापय्य तादृशे स्वात्मनि तत्र तत्र तत्त त्पुरुषार्थानुभव प्रतिनियतस्थानेषु तां स्ता नुपासकां स्तत्त दुपासनानुगुण पुरुषार्थप्राप्तये यथार्हं स्वस्व शक्त्यैव प्रवर्तमानान्वा सूरिभि रभ्युद्गम्यनीयमानान्वा कृत्वा तंतं पुरुषार्थ मसंकीर्णमेवा नुभावयतीति न कश्चिद्विरोधः-इत्यपि कल्पनं परास्तं, सर्वस्याप्यस्यार्थस्य प्रमाणपथाति वर्तित्वात् । उपासनाभेदेन पुरुषार्थभेदे विद्यानां वैकल्पिक त्वाद्यनुपपत्तेः प्रागेवोक्तत्वात् । मुक्तस्वरूपस्या प्यणुतया क्वचिदेकदेश एव स्थिते रावश्यकत्वेपि धर्मभूतज्ञानत एव तत्तद्भोग्यवस्तूनां सन्निकर्षस्य भोगस्य च वाच्यतया धर्मभूतज्ञानस्य च तदा निरवधिकविकासवत्तया वस्तुविशेषासन्निकर्षस्य वा तदनुभवविरहस्य वा कथंचिदपि दुरुपपादत्वात ।

एतेनैव – परं ब्रह्मप्रकृतेः परस्ता दतिरोहितं समन्तत आकाश वत्प्रदीप्तमपि सर्वत्र नैकविधानन्दहेतुपरिकरविशिष्टं वर्तते । अपितु

नुभवरूपकैवल्यस्यानुषंगिकप्राप्यतया ब्रह्मण एव च विशिष्टस्य प्रधान प्राप्यतया प्रतिसन्धानावश्यकतायाः प्रागेवोपपादिततया पंचाग्निविद्या निर्दिष्टयो रुभयो रपि तावतापि भोग्यविधया ब्रह्मप्राप्ते र्वारयितु मशक्यत्वात् । किंच – भोग्यविधया ब्रह्मप्राप्ति र्हि स्वादुतमतया नुभूयमानब्रह्मसंन्निकर्ष एवेतिहि भवता मभिमतम् । पंचाग्निविद्या निष्ठानां वदभावः किमभावप्रयुक्त इतीह विचारणीयम् । नताव द्ब्रह्मसन्निकर्षाभावप्रयुक्तः , नित्यसन्निकृष्टत्वा द्ब्रह्मणः । नापि ब्रह्म ण्यनुभूयमानत्वाभावप्रयुक्तः , पंचाग्निविद्यानिष्टाना मपि ब्रह्मप्राप्ति श्रवणेन तदनुभवस्य भवद्भि रप्यभ्युपगतत्वात् । नापि ब्रह्मणि स्वादुतमतया ऽनुभूयमानत्वाभावप्रयुक्तः इति शक्यं वक्तुम् , सोपि ह्यभावः पंचाग्निविद्यानिष्ठै रप्यनुभूयमाने ब्रह्मणि किं स्वादुतमत्व रूपविषयाभावात किं वा सत्यपि तत्र स्वादुतमत्वे तदनुभवसाम- ग्रयभावात् । नाद्यः स्वादुतमत्वस्या नुकूलत्वरूपत्वे वा निरतिशा- यानुकूलत्वरूपत्वे वा अनवधिकातिशयानन्दरूपत्वा समन्वयाधिकर णानन्दमयादिप्रतिष्ठापिते ब्रह्मण्यपलपितु मशक्यत्वात । न द्वितीयः, पंचाग्निविदः देशविशेषगते रिव ज्ञानसंकोचका विद्यापरपर्यायकर्मणो निश्शेषविलये सति स्वत स्सर्वत्र प्रसरता धर्मभूतज्ञानेन अनन्या पेक्षेण ब्रह्मणि धर्मिभूते गृह्यमाणे तद्गतस्वादुतमत्वरूप धर्मग्रह- णेपि तस्यैव ज्ञानस्य सामग्रीत्वात । अन्यथा " सर्वं ह पश्यः पश्यति " इत्यादि बहुविधप्रमाणगण व्याकोपप्रसंगात । किं बहुना मुक्तै र्न केवलं ब्रह्मैव स्वादुतमतयानुभूयते । अपितु ब्रह्मात्मकत्वेनानुसन्धी यमानं कृत्स्नं जगदपि । तथानुभव प्रतिबन्धककर्मणो निश्शेषविग मात् । तदिद मनुगृहीतं श्रीमतिभाष्ये भूमाधिकरणे – " कर्मवश्या नां क्षेत्रज्ञानां ब्रह्मणोन्यत्वेनानुभूयमानं कृत्स्नं जगत्कर्मानुरूपं दुःखंच परिमितसुखंच भवति । अतो ब्रह्मणोन्यतया परिमितसुखत्वेन दुः- खत्वेनच जगदनुभवस्य कर्मनिमित्तत्वात कर्मरूपा विद्याविनिर्मुक्तस्य तदेवजगत् विभूतिगुणविशिष्टब्रह्मानुभवान्तर्गतं सुखमेवभवति । यथा

पित्तोपहतेन पीयमानं पयः पित्ततारतम्येन अल्पसुखं विपरीतं च भवति तदेवपयः पित्तानुपहितस्यसुखायैवभवति । यथैव राजपुत्रस्य पितुर्लीलोपकरण मतथात्वेनानुसन्धीयमानं प्रियत्वमनुपगतं तथात्वानु सन्धाने प्रियतमम्भवति तथा निरतिशयानन्द स्वरूपस्य ब्रह्मणोऽनव धिकातिशयासंख्येय कल्याणगुणाकरस्य लीलोपकरणं तदात्मकंचानु सन्धियमानं जग न्निरतिशयप्रीतये भवत्येव ” इति । तदेवं पंचाग्निविदां परं जैमिनिरित्यादि सूत्रभाष्यरीत्या विशिष्ट गतिबलान्निश्शेषा विद्यानिवृत्ता ववश्यस्वीकार्यायां तत एव च भूमाधिकरण भाष्यरीत्या ब्रह्मानुबन्धिनो जगत एव स्वादुतमतया तदीयानुभव विषयतायां चावश्य स्वीकार्यायां सत्यां ब्रह्मण एव स्वादुतमत्व प्रकारक तदनुभव विषयत्वाभाववर्णनं विस्मयावहमेव विदुषां ।

एतेन – लोकेपि स्वभावतो मधुरेष्व पीक्षु क्षौद्र गुडादिषु वस्तुषु कस्मैचि त्किंचिदेव रोचते । स्व स्ववासनानुगुण रुचिभेदवशाच्च तत्त त्पुरुषैः स्वस्व रुचि परिगृहीतमेव वस्तु स्वादुतम मनुभवति नापरं मधुरतमपि वस्त्वनुभवितुं प्रवर्तते । तस्मा त्प्रकृति प्रत्यगात्मना मनुकूलत्व तारतम्येपि प्राथमिक स्वरुचि भेदवशा दधिकारिणां तत्त त्परिग्रहो व्यवतिष्ठते – इत्यपि उपदर्शित भूमाधिकर भाष्यार्था नवधारण निबन्धनमिति व्यक्तीकृतम् । लोके हि रुचिभेदस्य स्वादुतातरतम भाव विपर्यासानुभवस्य च कर्मरूपाविद्याकृततया भाष्यएव. भाषितत्वा त्तद्दृष्टान्तेन ब्रह्मविषयक विद्यावत्सु विशिष्टदेशं गतेषु निश्शेषनिवृत्ताविद्येषु यथावस्थितस्वादुतातरतमभावाग्रहस्य तद्विपर्यासग्रहस्य दुरुपपादत्वात प्रकृतिप्रत्यगात्मपरमात्मसु यथा क्रम मुत्तरोत्तरातिशायिततरतमभावापन्नानांस्वादुताना मनुकूलत्वा परपर्यायाणां यथावस्थितमेव ते ग्रहणावश्यं भावात ।

अथ निरतिशयानुकूलत्वं परब्रह्मासाधारणमित्यानन्दमयाधिकरणादिस्थितमास्ताम् । तादृशंचानुकूलत्वं कर्मविशेषात्पंचाग्निविद्या

तत्तदुपासकोपासनानुगुण्येन तत्र तत्र परस्परविलक्षण नानाविध भोग्यभोगोपकरण भोगस्थानादिलक्षण नानापरिकरविशिष्टवेषेण तादृशपरिकराविशिष्टवेषेण च प्रदीप्तं वर्तते । तादृशपरिकराविशिष्ट वेषेण वर्तमानब्रह्मप्रदेशविशेषे विलक्षणानन्दहेतुपरिकरविशेषविशिष्ट ब्रह्मप्राप्तिलक्षणपरिपूर्ण ब्रह्मप्राप्त्यभावा न्महति नभसि खद्योतवत्पर स्मि न्ब्रह्मणि स्वात्मानुभवप्रतिनियते तादृशप्रदेशविशेषे स्वाच्छन्द्येन प्रवर्तमानानां प्रकृतिवियुक्त स्व स्वरूपापन्नप्रत्यगात्मनां स्वात्मानुभवानन्दमात्रतृप्तत्वलक्षण कैवल्यमोक्ष एव पुरुषार्थः । तादृशपरिकर विशेषविशिष्ट ब्रह्मप्रदेशविशेषे प्रवर्तमानानां परब्रह्मनिष्ठानां च परिपूर्णब्रह्मप्राप्तिलक्षण परममोक्ष एव पुरुषार्थ इति पुरुषार्थतारतम्यं हि सुपपादं - इत्यपि वृथा कथामात्र मिति वेदितव्यम् । ब्रह्मनिष्ठाना मपि स्वरूपाणुतया निरवधिकविकासशालि धर्मभूतज्ञान सन्निकर्षेणैव तादृशविलक्षणानन्दहेतु भोग्यभोगोपकरणादिलक्षण परिकर विशिष्ट ब्रह्मप्राप्ते र्वाच्यतया पंचाग्निविदा मपि तथाविधज्ञान सन्निकर्षेण तत्प्राप्ते रावश्यकतया तदसम्भवकथनासंगतेः । एवं प्रति वस्तु ब्रह्मणः परिपूर्णतया मुक्तस्य च तथानुभवस्याऽवश्यकतया पंचाग्निविदः परिपूर्णब्रह्मप्राप्त्यभावकथन मत्यन्तानुपपन्नम् । तथाच वाक्याधिकरणटीकायां - "कथं तर्हि भवत्पक्षे शरीरभूतेषु चिदचिद्वस्तुषु परमात्मनः पूर्णत्वम् । अणुमात्रेपि वस्तुनि स्थितस्य निरवधिकषाड्गुण्यविशिष्टतया प्रतिपत्तियोग्यत्व मिति ब्रूमः" इत्यादि । किंच - शारीरकभाष्यान्ते - "नचोच्छिन्नकर्मबन्धस्य संकुचित ज्ञानस्य परब्रह्मानुभवैकस्वभावस्य तदेकप्रियस्यानवधिकातिशयानन्दं ब्रह्मानुभवतोऽन्यापेक्षा तदर्थारम्भाद्यसम्भवा त्पुनरावृत्तिशंका" इत्यत्र मुक्तानां पुनरावृत्त्यभावे अन्यापेक्षाद्यसम्भव स्तत्र च निरतिशयानन्दब्रह्मानुभव श्च हेतुत्वेनोच्यते । पंचाग्निविद्यानिष्ठस्य परिपूर्ण ब्रह्मप्राप्त्यभावे च तादृशब्रह्मप्राप्त्यपेक्षाया स्तदर्थारम्भादे श्चावश्यं

भावेन पुनरावृत्ति र्दुर्वारा। उच्छिन्नकर्मबन्धतया तस्य पुनरावृ- त्त्यभावेतु स्वीक्रियमाणे उच्छिन्नकर्मबन्धावहेतुकतयात्र विवक्षित मसंकुचितज्ञानत्वं तद्धेतुकत्वेनात्र विवक्षितो निरवधिकातिशयानन्द ब्रह्मानुभवोपि तस्यावश्यस्वीकार्य एवेत्यवधार्यताम्।

यद्यपि - तत्रैव भाष्ये - "नच परमपुरुष स्सत्यसंकल्पोत्यर्थ प्रियं ज्ञानिनं लब्ध्वा कदाचिदावर्तयिष्यति। य एव माह - प्रियोहि ज्ञानिनोत्यर्थ महं सच मम प्रियः। उदारा स्सर्व एवैते ज्ञानीत्वात्मैव मे मतम्। इति" इत्यनेन ज्ञानिन एवावृत्त्यभावभाष णात् जिज्ञासोः पंचाग्निविद्यानिष्ठस्य पुनरावृत्ति र्दुर्वारा। तथापि तस्यात्मानन्दमात्रानुभवरूप' कैवल्याधिगमा त्पूर्वं फलान्तरार्थितया ज्ञानित्वाभावेपि तादृशकैवल्यारम्भककर्मविलये सति भगवदेकप्रियत्वेन ज्ञानित्वावश्यम्भावा न्न पुनरावृत्ति श्शक्यशंकेति।

अपिच- कैवल्यमोक्षः परममोक्षइति मोक्षभेदकल्पनमपि अस्याधिक रणभाष्यविरुद्धमेव। तत्रहि विशेषणाच्चेतिसूत्रे - "तथाहि बहुधा विप्रतिपद्यन्ते, केचि द्वित्तिमात्रस्यात्मन स्स्वरूपोच्छित्तिलक्षणं मोक्ष माचक्षते। अन्ये वित्तिमात्रस्यैव सतो ऽविद्यास्तमयं। अन्ये पाषाणक- ल्पस्यात्मनो ज्ञानाद्यशेष वैशेषिकगुणोच्छेदलक्षणं कैवल्यरूपं। अ- परे त्वपहतपाप्मानं परमात्मानमभ्युपगच्छन्त स्तस्यैवो पाधिसंसर्गनिमित्त जीवभावस्यो पाध्यपगमेन तद्भावलक्षणं मोक्षमातिष्ठन्ते" इत्यनेन तत्तद्वादिविकल्पानभिधाय "त्रय्यन्तनिष्णातास्तु जगदेककारणस्याशेष हेयप्रत्यनीकानन्त ज्ञानानन्दैकस्वरूपस्य स्वाभाविकानवधिकातिशया संख्येयकल्याणगुणाकरस्य सकलेतरविलक्षणस्य सर्वात्मभूतस्य परस्य ब्रह्मणश्शरीरतया प्रकारभूतस्या नुकूलापरिच्छिन्नज्ञानस्वरूपस्य परमा- त्मानुभवैक रसस्य जीवस्या नादिकर्मरूपाविद्या विमोहितस्वरूपस्य विद्योच्छेदपूर्वक स्वाभाविक परमात्मानुभव मेव मोक्षमाचक्षते "

इत्यनेन स्वाभाविकपरमात्मानुभवस्यैव मोक्षरूपता भाषिता स्वाभिमता। नहीदं भाष्यं भवदुदितमोक्षभेदे युज्यते । तदानींहि तत्र "स्वाभाविकपरमात्मानुभवं स्वाभाविकस्वात्मानुभवंच मोक्षमाचक्षते " इति वचनव्यत्तया भाव्यं । स्पष्टंचेदं न्यायसिद्धांजनादौ । नच भोगस्थान विधया स्वाभाविकपरमात्मानुभवरूपतायाः पंचाग्निवित्सम्बन्धि कैवल्य मोक्षे मयाप्यंगीकारान्न मम तद्भाष्यविरोधइतिवाच्यं, तथासति स्वा भाविक परमात्मानुभवस्यैव भोग्यविधयाप्राप्तिरूपतया पंचाग्निविदि तदभावकथनासंगतेः । परब्रह्मयाथात्म्यानुभवस्यैव परब्रह्म भोगरूप-त्वात् । स्पष्टंचेदं भोगमात्र सूत्रभाष्यादौ । एवं वाक्यान्वयाधिकर-णोपसंहारभाष्य विरुद्ध मप्युपदर्शितमोक्षद्वयकल्पनं वेदितव्यम् । तत्रहि " एतावदरेखल्वमृतत्वं " इतिवाक्यमधिकृत्य " ब्रह्मप्राप्तिरेवामृत-त्वमित्युक्तवान् " इत्युक्तमिति ।

एतेन – प्रकृतिमण्डला त्परस्ता त्समन्ततः प्रदीप्तस्यापि परस्य ब्रह्मणो नैकविधा प्राप्तिर्दृश्यते । नहि खल्व र्चिरादि मार्गेण गतानां परब्रह्मोपासकाना मपि लोकविशेषप्राप्ति र्लोकविशेषे प्रविष्टोन्मादक नगरोद्यान विमानक्रीडोद्देश विशेषादिप्राप्ति स्सकलेतरपदार्थ विस्मा-रक निरवधिक सुखसन्दोहात्मकानुभव विशेषहेतु भगव द्दिव्यमंगल विग्रह तच्चरणारविन्द तत्कटाक्षपातादि श्चैकरूपा सम्प्रतिपन्ना । तत्त द्वस्तुगत स्वाभाविकानुकूलत्वाकाराणां तारतम्यं हि स्वतस्सिद्धम् । नहि ब्रह्मस्वरूप गुणविग्रहादिगत मनुकूलतमत्वं विभूतिभूतेषु प्रकृत्यादिषु प्रामाणिकम् । यथाच निश्शेषाविद्यानिवृत्ति र्देशविशेष कालविशेषादिसापेक्षा तथैव तत्तद्वस्तु गतानुकूलत्वातिशय विषय-कानुभव विशेषोपि स्थानविशेषे तत्त द्वस्तु सन्निकर्ष विशेषादिसा पेक्ष एव – इत्यपि निरस्तं वस्तुष्वनुकूलता तारतम्यस्य कर्मकृत तायाः भूमाधिकरण भाष्यभाषिततया तस्य स्वाभाविकत्वा सम्भवात् । सम्भवाभ्युपगमेपि वा मुक्तस्य सर्ववस्तु विषयकानुभवेपि अविद्यारूप

प्रतिबन्धक निवृत्तेरेव केवलं हेतुताया स्तत्र तत्र भाष्ये उक्ततया तत्त द्वस्तु गतानुकूलत्वातिशय विषयकानुभवेपि तस्या एव हेतुत्वेन स्थानविशेष तत्तद्वस्तु सन्निकर्ष विशेषादिसापेक्षत्व कथनस्या युक्तत्वात् । मुक्तानां स्थानविशेष तत्त द्वस्तुभि स्सन्निकर्षस्य धर्मभूत ज्ञानेनैवोपपादनीयतया तेनैव सर्वै रेवस्थानै स्सर्वै रेव वस्तुभि स्सन्निकर्षस्या विशिष्टत्वात, तत्तद्वस्तु सन्निकर्षसापेक्षत्वेपि तत्तद्वस्तुगतानुकूलतातिशय विषयकानुभवाभावस्य कस्मिंश्चिदपि मुक्ते दुरुपपादत्वाच्च । मुक्तस्य वस्तुविशेषगतानुकूलता तिशयविषयका नुभवविरहकल्पने तस्य सर्ववस्त्वनुभवकथनपरभूमाधिकरण जग द्व्यापारवर्जाधिकरणादिभाष्यैः " सर्वं ह पश्यः पश्यति " इत्यादि बहुविधप्रमाणै श्च विरोधप्रसंगाच्च ।

यदपि - प्रकृतितत्त्वनिबन्धनैश्वर्ये पुरुषार्थार्थिनामपि हि प्रकृति सत्त्वस्य सर्वत्रैकत्वेपि न लोकविशेषप्राप्त्य प्सरःप्राप्त्यो स्तुल्यरूपता दृष्टा । नहीन्द्रलोक एव हिरण्यगर्भैश्वर्यप्राप्ति स्सम्भवति । तथाच प्रकृतिमण्डल एवै श्वर्यविशेषप्राप्ति र्यथास्थानभेदसापेक्षा तथा निश्शेषा विद्यानिवृत्तिदेशविशेषेपि पुरुषार्थभेद स्स्थानभेदो लोकभेद श्च सम्प्रतिपन्न एव - इति, तदपि तत्र दृष्टान्तदार्ष्टान्तिकयो र्विशेषानवधारणनिबन्धनम् । बद्धानां हि कर्मसंकुचितज्ञानानां करणाधीनज्ञानप्रसराणां सूक्ष्मव्यवहितवस्तुषु करणसन्निकर्षविरहाद तत्र ज्ञानप्रसराभावात् एकलोकास्थितानां मन्यलोकैश्वर्याननुभवरूपा तद प्राप्ति र्युज्यते । नखल्वेवं मुक्तानां निश्शेषनिवृत्तकर्मणां अत एवा संकुचितज्ञानानां करणनिरपेक्षाणां सूक्ष्मव्यवहितवस्तु ष्वसन्निकर्ष सम्भवः येनानन्तेषु नित्यविभूतिस्थानविशेषेषु क्वचिन्मुक्तस्यासन्निकर्षो वा तन्मूलको ननुभवो वा शक्येत कल्पयितुम् । अत एव - " य इहात्मान मनुविद्य व्रज न्त्येतांश्च सर्वा न्कामां स्तेषां सर्वेषु लोकेषु कामचारो भवति " " इमा न्लोका न्कामान्नी कामरूप्यनु

संचरन् " " स वा एष एतेन दिव्येन चक्षुषा मनसैता न्कामान् पश्यन् रमते य एते ब्रह्मलोके " " तं वा एतं देवा आत्मान मुपासते" "तस्मा त्तेषां सर्वेच लोका आत्ता स्सर्वेच कामा स्सर्वांश्च लोका नाप्नोति सर्वांश्च कामा न्यस्त मात्मान मनुविद्य विजानाति " इत्यादौ मुक्तानां सर्वकामसर्वलोकावाप्ति राम्नायते, मुक्तानां भोगस्थानविशेषभोग्यवस्तुविशेषनियमने च तदिदं सर्वं विरुद्ध्यते ।

एतेन – तस्मा द्देशविशेषावच्छिन्नातिरोहित ब्रह्मसंयोगलक्षणाया स्स्वस्वाभिमतपुरुषार्थ भोगाधारविपुलतरस्थानभूत ब्रह्मप्राप्ते स्मानवायत्तायाः पंचाग्निविद्ब्रह्मविदो रविशेषेण प्रतिपादनमात्रेण न तयोः पुरुषार्थभेदो ऽपलपितुं शक्यः । यथोक्तलक्षण स्वादुतमानुभूयमान तत्तद्वस्तुविलक्षणप्राप्त्यो रेव पार्थक्येन तयोः पुरुषार्थत्व सम्भवादिति – इत्यप्यसमंजसं वेदितव्यम् । ब्रह्मवित्सु निरंकुशज्ञानवत्सु निरतिशयसुखरूपत्वेना नुभूयमानाखिलवस्तुप्राप्तिमत्सु इतरेतर व्यावृत्तयोः तत्तद्वस्तुविलक्षणप्राप्त्यो रेव दुर्निरूपत्वात् । तस्मात् पंचाग्निविदां भोगाधारतयैव ब्रह्मप्राप्ति र्न भोग्यतयेति कल्पनं प्रमाणसम्प्रदायप्रत्यनीक मेव । ब्रह्मणो भोग्यताहि याथात्म्यानुभवविषयता रूपा । तथाच भोगमात्रसूत्रे " ब्रह्म याथात्म्यानुभवरूपभोग मात्रे मुक्तस्य ब्रह्मसाम्यप्रतिपादनात् " इति भाष्ये ब्रह्मभोगस्य याथात्म्यानुभवरूपत्वं भाषितम् । तथाच पंचाग्निविदां ब्रह्मभोगाभावे सति ब्रह्मयाथात्म्यानुभवविरह एव समर्थित इति कथं तेषां मुक्तता स्वीकर्तुं शक्या ।

यदपि – परस्य ब्रह्मणो भोगाधारस्थानरूपता च " एव मेवैष सम्प्रसादो ऽस्मा च्छरीरा त्समुत्थाय परं ज्योति रुपसम्पद्य स्वेन रूपेणाभिनिष्पद्यते स उत्तमः पुरुष स्स तत्र पर्येति जक्षन्क्रीडन् रममाण स्स्त्रीभि र्वा यानैर्वा ज्ञातिभि र्वा नोपजनं स्मर न्निदं शरीर" मिति छान्दोग्याष्टमप्रपाठ द्वादशखण्डगत द्वितीयतृतीयखण्डिकां

शभूतश्रुतौ तत्रेति परब्रह्मणो भोगाधारस्थानतया निर्देशा त्सिद्धा-इति तदपि स्वोदाहृतश्रुत्यर्थानभिज्ञाननिबन्धनम् । तत्र हि तत्रेत्यस्य नाधारसप्तमीत्वं, तथा सति दहराधिकरणे "स उत्तमः पुरुष स्स तत्र पर्येति जक्षत्क्रीडन् रममाण स्स्त्रीभि र्वा याने र्वा नोपजनं स्मर न्निदं शरीर" मिति प्राप्यस्य परस्य ज्योतिषः पुरुषोत्तमत्वं निवृत्ततिरोधानस्य परं ज्योति रुपसम्पन्नस्य प्रत्यगात्मनो ब्रह्मलोके यथेष्टभोगावाप्तिं प्रियाप्रियाविमुक्त कर्मनिमित्तशरीराद्यपुरुषार्थाननुसन्धानं चाभिधाय" इत्येतद्भाष्ये तत्र पर्येतीत्यर्थविवरणावसरे ब्रह्मलोकस्य भोगाधारत्वभाषणविरोधात् । किन्तु विषयसप्तमी, पर्येतीत्यस्य च परितोनुभवोर्थः । तत्र व्यासार्यैः "तत्र-परमात्मनि पर्येति-तं परितोनुभवति" इति विवृतत्वात् । यद्यपि-"यद्वा अनुसंचरति 'कामरूप्यनुसंचरन् येन येन धाता गच्छती' ति श्रुत्य न्तरात्" इति पर्येतीत्यस्य अनुसंचरणार्थकतया पक्षान्तर मुक्तं, तथापि तस्मिन्नपि पक्षे धात्वर्थमात्रभेदकथनात् तत्रेत्यस्य प्रथमपक्षा भिमतं विषयसप्तमीत्व मभिमतं टीकाकृता मित्यवगम्यते । अस्मि श्च पक्षे सप्तम्यर्थस्य विषयत्वस्य ज्ञानविशेषरूपेषु जक्षणक्रीडनरमणेष्वन्वयः । तथा च स्त्र्यादिभि स्सह भोग्यभोगोपकरणै ब्रह्म भुञ्जान एव सपर्येति संचरति यथेष्टं इति तद्वाक्यार्थः । ब्रह्मेतर सर्ववस्त्वनुभवस्यापि ब्रह्मानुभवा विनाभूतत्वंचा त्राभिसंहित मधिकं लभ्यत इति किंचि द्व्यवहितान्वय मप्याश्रित्य पक्षान्तर मास्थितं टीकाकृद्भिः । यदि पुनरेव मर्थो नाभ्युपगम्यते त्र तदा दहरविद्या निष्ठस्यापि भोग्यतया ब्रह्मप्राप्ति र्भवद्भि र्दुरुपपादा दहर विद्यायां तन्निष्ठस्य ब्रह्मभोग प्रतिपादक वाक्यान्तरा नुपलम्भात् । अथ ब्रह्मोपासकत्वा त्तस्य तत्क्रतु न्यायेन ब्रह्मभोग आवश्यक इति चे देवंसति पंचाग्निविदोपि ब्रह्मविषयकोपासनवत्तया स किं नेष्यते । अथ तत्क्रतुन्यायेन तदुपासकस्य तत्प्राप्तिमात्रं बोध्यते । पंचाग्नि

विद्यानिष्ठस्य च भोगाधारतया ब्रह्मप्राप्तिमात्रेणैव तत्क्रतुन्यायोपपत्तेः न भोग्यतयापि तत्प्राप्तिः कल्प्यते प्रमाणाभावादिति चेत्तुल्य मिद मन्यत्रापीति कथं दहरविद्यानिष्ठस्यापि भोग्यविधया ब्रह्मप्राप्तिं साधयन्ति भवन्तः ।

यत्तु "तद्य एवैतं ब्रह्मलोकं ब्रह्मचर्येणानुविन्दन्ति तेषा मेवैष ब्रह्मलोक स्तेषां सर्वेषु लोकेषु कामचारो भवति । अथ तद्यज्ञ इत्याचक्षते ब्रह्मचर्यमेव तद्ब्रह्मचर्येण ह्येषयोज्ञाता तं विन्दते"इत्यादिकं दहरविद्यागतं वाक्यं, तत्तु "सएनान्ब्रह्मगमयति"इत्यादि पञ्चाग्निविद्याम्नातवाक्य तुल्यं भोगस्थानतया ब्रह्मप्राप्तिपरतयैव भवतामुपपन्नं । यदितु "यच्चास्ये-हास्ति यच्चानास्ति सर्वं तदस्मिन्समाहितं" इतिवाक्यमेव परब्रह्म णो भोग्याधारताप्रतिपादकमपि दहरोपासकस्य ब्रह्मातिरिक्तभोग्या-भावात् निरतिशयभोग्यतापरतयैव टीकायामुपपादितमिति तदेवतस्य भोग्यतया ब्रह्मप्राप्तिग्राहक मित्युच्यते, तदा तयैवं युक्त्यां "तत्र-पर्येति" इतिवाक्यस्यापि भोगाधारत्वप्रतिपादकतया भवत्स्वीकृतस्य निरतिशयभोग्यतायामेव पर्यवसान मावश्यकं भोग्यस्य भोगाधारताया अपि निरतिशयभोग्यतापर्यवसितत्वादिति न तस्य यथाश्रुतब्रह्मनिष्ठ भोगाधारताप्रमाणत्वसम्भवः । यदिच - "ब्रह्मविदाप्नोतिपरं" इत्यु पक्रम्य तद्विवरणपरे मन्त्रे "सोश्नुते सर्वान्कामान्सहब्रह्मणा" इत्य त्राश्नोतिना ब्रह्मोपासकसामान्यस्य भोग्यतया ब्रह्मप्राप्तिप्रतिपादनादेव दहरोपासकस्यापि ब्रह्मोपासकत्वाविशेषा त्तथाप्राप्ति स्तैत्तिरीयवाक्या-दे वास्मात्सिद्ध्यतीतिचे देवंसति पञ्चाग्निविद्यानिष्ठस्यापि "उभये-पिहि परिपूर्णं ब्रह्मोपासते मुखभेदेन" इत्यादि प्रदर्शित सारग्रन्थेन ब्रह्मोपासकत्वाभिधानाद्भोग्यतया ब्रह्मप्राप्तिस्तस्मादेव तैत्तिरीयवाक्या दापतन्ती न कथञ्चिदपि भवद्भिर्वारयितुं शक्ये त्यलं पल्लवितेन ।

एतेनैव - उक्तलक्षणपरिपूर्णब्रह्मप्राप्तीच्छया ब्रह्मोपासनकरणादेव च ब्रह्मोपासकानां ब्रह्मनिष्ठत्वेनव्यवहारः । यथोक्तलक्षणविलक्षणात्म प्राप्तीच्छयात्मोपासनकरणादेव पञ्चाग्निविदा मात्मोपासकत्वेन व्यवहार श्चोपपद्यते । अन्यथा तादृशव्यवहारभेदकाकारस्यैव दुर्वचत्वात् । प्राधान्येन तत्तदुपासकेष्वेवहि तत्तदुपासकत्वव्यवहारोमुख्य इत्यनव धाननिबन्धनमिति व्यक्तीकृतं । अनुपदोपदर्शित सारग्रन्धे पञ्चा ग्निविदोपि ब्रह्मोपासत्वकण्ठोक्तेः । क्वाचित्कस्य तादृशव्यवहारभेद-स्यापि तत्तन्मुख्यविशेष्यकोपासनमात्राभिप्रायकतया स्तत्रैव सारग्रन्धे स्पष्टमवगमाच्च । प्राधान्येन तत्तदुपासनेष्वेव तत्तदुपासकत्वव्यवहार-स्यमुख्यत्वेपि प्राधान्येन तत्तदुपासनत्वस्य तत्तन्मुख्यविशेष्यकोपासन वत्त्वरूपत्वेनैवोपपत्तेः । प्रधानप्राप्यतया तत्तदुपासनवत्त्वरूपताकल्पन-स्या यद्वैकमूलकत्वाच्च ।

यत्तु - अनयोः पुरुषार्थभेद तदनुभवस्थानभेदादिकं च श्रुतिस्मृ-तीतिहासपुराण भगवच्छास्त्रादिषु बहुधा प्रपञ्चितं नापिलपितुं शक्यं प्रमाणपरतन्त्रैरास्तिकाग्रेसरै रिति, तदपि न सत् , क्वचिदपि प्रमाणशा-कले तयोः पुरुषार्थभेदादे रप्रतिपादनात् । तद्भेदप्रदर्शनाभिनिविष्ट चित्तैरुपन्यस्तानां वचनानां प्राचीनैरेव निबन्धकारै स्तद्भेद साधन प्रमाणत्वा सम्भवस्य व्यवस्थापितत्वात् । अन्यथा मुक्तानामपि पुरु षार्थभेदस्वीकारे मुक्ताना मानन्दतारतम्यवादिना मानन्दतीर्थीयानामेव विजयप्रसंगात । भगवद्भाष्यकाराहि मुक्तिपादोपक्रमे " परंब्रह्मो-पासीनानामात्मानश्च प्रकृतिवियुक्तं ब्रह्मात्मकमुपासकाना मर्चिरादि-नामार्गेणा पुनरावृत्तिलक्षणागतिरुक्ता " इत्यनेन वृत्तानुवादेन उपा-सक द्वैविध्यमनुवदन्तोपि " इदानीं मुक्तानामैश्वर्यप्रकारं चिन्तयितु

मारभते " इत्यनेन मुक्तैश्वर्यप्रकारविचारारम्भं प्रतिजानन्तोपि आपा दपरिसमाप्ति न क्वचिदपि भवदुपदर्शित मुक्तैश्वर्यप्रकारभेदं लेशतो पि प्रादर्शयन् । प्रत्युत " जगद्व्यापारवर्जमेव मुक्तैश्वर्यं " इत्यादि भाषमाणा मुक्तैश्वर्यैकरूप्यमेव व्यवास्थापयन् । भवदुक्तस्य मुक्त पुरुषार्थभेदादीनां श्रुतिस्मृतीतिहासपुराण भगवच्छास्त्रादिषु बहुथा प्रपञ्चितत्वस्य वास्तवत्वेहि तदनुसारेण मुक्तैश्वर्यप्रकारभेदो ऽवश्य भाषणीय एव स्यात । तस्मा द्भगवद्भाष्यकाराणां भवदुत्प्रेक्षित श्रुतिस्मृतीतिहासपुराण भगवच्छास्त्राद्यनभिज्ञतैव भवद्भिरापादितास्या द्भङ्ग्यन्तरेण ।

किं बहुना, जगद्व्यापार वर्जाधिकरणे मुक्तैश्वर्यं भोगतः परब्रह्मणा परमसाम्यरूपमिति " यदापश्यः पश्यते रुक्मवर्णं कर्तारमीशं पुरुषं ब्रह्मयोनिं । तदाविद्वान्पुण्यपापे विधूयनिरञ्जनः परमं साम्यमुपैति " इत्यादिश्रुत्यनुसारेण प्रतिष्ठापितं । ततश्च पञ्चाग्निविदोपि मुक्ततया परब्रह्मसमानभोगे अभ्युपगन्तव्ये मुक्तान्तरेण विद्यान्तरनिष्ठेनापि भोगसाम्यंनास्तीति स्वैरंवक्तुमुपक्रान्तानां साहसमिदं विस्मयावहमेवविदुषां सर्वेषाम् ।

तस्मात पंचाग्निविद्या तदितर विद्यानिष्ठानां मुक्तैश्वर्यमेकरूप मेव न पुनर्मात्रयापि प्राप्यभेदस्थानभेदादि कलुषितमिति भगवद्भाष्यकार प्रतिष्ठापित सिद्धान्तघण्टापथ प्रविष्टैशिष्टैरास्थेयमिति । तस्मात्साधुसंगृह्यातुगृहीतं भगवन्निगमान्तगुरुभिः " सर्व कर्म विनिर्मोक्षे मुक्तिभेदः कथं भवेत् । कर्मैकदेशयोगेतु न मुक्ति र्भुक्तिभेदवत । " इत्यादीति सर्वसमंजसम् ।

कस्तूरिरंगसूरि र्वस्तूभूतो गुरोः कृपालोकैः ।
आर्याणा मादेशा त्कार्याधिकृते न्यरूपय तत्त्वम् ॥
गुरुवरचरणाम्बुरुह ध्यानसुधास्वादलालसेनेत्थम् ।
कार्याधिकरणतत्त्वं यदलेखिदम्मुदे सदास्तु सताम् ॥

तत्तादृक्प्रौढ विद्वत्परिबृढधिषणा धारणाधारणार्हे
ष्वर्थेष्वेवैषबाल श्चलमतिरपटु श्चेष्टमानोयथेष्टम् ।
आर्यैराचार्यधुर्यैरपिच सकरुणापांगधारानुषंगं
दृष्टस्स्वस्यैकपात्रीकृतइति वददोनुग्रहैश्वर्यकार्यम् ॥

श्रीहयवदनपरब्रह्मणेनमः ॥

इति श्रीमद्वाधूलकुलजलधिकौस्तुभ शेषाचार्यवर्यतनयस्य
सन्ततसमुपासित सदाचार्यस्य श्रीमतः
कस्तूरि रंगाचार्यस्य कृतिषुपंचविंशे
कार्याधिकरणनाम्नि प्रबन्धे

प्रथमः परिच्छेदः ॥ १ ॥